९३
२८

93
28

अथ

ग्रन्थनाम:	"ब्रह्मसूत्रवृत्तिः"	(अपूर्ण)
कर्तृनाम:	श्रीरामानन्दः	
विषयः -	विशिष्टाद्वैतवेदान्तम्	

Subject Bramha sutravruthi
wRitor - Sri Rama Nanda
Title. Vishita Dytham
2254

९३/२८

अथ

बृहत्सूक्ष्म वृत्ति

93/28

बहत्सूत्रवृत्तिरामानंदी प्रारंभः क्रियते॥ ॥श्रीरस्तु॥



रामानन्दप्रणीत 93/28

2254

ब्र.सू.
३

श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ श्रीरामचरणद्वंद्वं द्वंद्वानंदसाधनं नमामि यद्रजोयोगात्पाषाणोपि
सुरत्वंगतः॥१॥ संगतिः संशयः पूर्वपक्षसिद्धांतयोः फलं॥ भाष्यस्थाः श्रुतयः सर्वाः सूत्राण्यनवशेषतः॥२॥ व्याख्यायंते स्फुटन्यायैर्मत
भेदोपि कुत्रचित्॥ उच्यते स्वबोधार्थं श्रीरामेण वीक्ष्यतामिदं॥३॥ इह खलु नित्याध्ययनविधिनाऽधीतस्वाध्यायमापातज्ञानवंतं पु
रुषार्थकामं ऐहिकामुष्मिकफलेषु विरक्तमुपलभमानः परमकारुणिको मुनिः सूत्रयामास॥ ॥अथातो ब्रह्मजिज्ञासेति॥ ॥
अत्राथशब्देन साधनचतुष्टयसंपत्त्यानंतर्यमुच्यते। तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इ
त्यादिना कर्मफलानामनित्यत्वं। परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति वैराग्यं कर्मफलेषु दर्शितं
शांतो दांत इत्यादिना शमाद्यादिः। न स पुनरावर्तत इति श्रुत्या मोक्षस्य नित्यत्वेन तत्रेच्छा। एतदानंतर्यमेव साधनचतुष्टयसंपत्त्या
नंतर्यं। अर्थान्मोक्षकामोधिकारी सूच्यते। अतःशब्देन साधनचतुष्टयस्य संभावना। ब्रह्मजिज्ञासेत्यनेनाज्ञातत्वेन विषयत्वं ज्ञा
तत्वेन प्रयोजनत्वं ब्रह्मणउक्तं भवति। एवं च प्रेक्षावत्प्रवृत्त्यंगभूताधिकार्यादिसमर्पकत्वेन समन्वयाद्यखिलविचारोपोद्घा
तत्वादादावस्य सूत्रस्य संगतिः। श्रवणविधिविषयवेदांतवाक्यैः स्वार्थनिर्णयायास्यापेक्षणात् श्रुतिसंगतिः। एवं सर्वेषां सू
त्राणां श्रुतिसंगतिः एवमग्रेपि शास्त्रसंगतिरूह्या। अथातो ब्रह्मजिज्ञासेत्यादिभिः सूत्रैः सर्ववेदांतानां ब्रह्मपरत्वेन समन्वयप्र
तिपादनात्तेषामध्याये समन्वयाध्यायसंगतिः। प्रथमपादे स्पष्टलिंगानां वाक्यानां विचार्यत्वादाद्यपादपादसंगतिः। अथास्याद्
यस्य सूत्रस्याधिकरणसंगतिर्नापेक्षिता। एतदानंतर्येष्वितरेषामपेक्षितं। तच्च तदधिकरणप्रस्तावे वक्ष्यामः। तत्र तावदात्मा वा
अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति वाक्यं द्रष्टव्य इति आत्मसाक्षात्कारफलमनूद्य तत्साधनत्वेन श्रवणं
विदधाति। श्रवणं नाम सर्वेषामुपनिषद्वाक्यानामद्वितीये ब्रह्मणि तात्पर्यविधारणानुकूलो न्यायविचारः। तादृशविचारा

राम
३

त्मकं वेदांतशास्त्रमारंभणीयं न वेति संदेहः। सर्वत्र पूर्वोत्तरपक्षयुक्तिद्वयं संशयबीजं द्रष्टव्यं। तत्र पूर्वःपक्षः
शास्त्रं नारंभणीयम्। विषयप्रयोजनशून्यत्वात्। तथा हि। संदिग्धो विषयः। ब्रह्म तु जीवात्मना ब्रह्मात्मभावा
न संदिग्धं। अहंप्रत्ययेन सत्यं ज्ञानमनंतं ब्रह्मेति वाक्येन च निश्चितत्वात्। ननु तत्त्वमस्यादिवाक्येनैक्यप्रति
पादनाद् अहंप्रत्ययेन भेदावभासनात् संशयः। अबाधितोऽहंप्रत्ययविरोधेनैक्यश्रुतेरुपचरितार्थत्वात्। नन्वबाध
स्ता[illegible] विषयत्वमहंप्रत्ययस्य। स्वयंप्रकाशआत्मन्यध्यासस्यायोगात्। नापि प्रयोजनं। उक्तरूपब्रह्मज्ञानेऽपि मु
क्तेरदर्शनात्। तस्माच्छास्त्रं नारंभणीयमिति प्राप्ते राद्धांतः। शास्त्रमारंभणीयं। विषयप्रयोजनयोः संभवात्। श्रु
त्यहंप्रत्ययविरोधेन जीवाभिन्नब्रह्मणः संदिग्धत्वेन विषयत्वात्। न च श्रुतेरुपचरितार्थत्वं। उपक्रमादिता
त्पर्यलिंगसद्भूतानेकवाक्यानामुपचरितार्थत्वायोगात्। मनुष्योऽहमित्यादौ परैरपि भ्रमत्वेन स्वीकारात्। क
र्तृत्वाध्यासोऽपि श्रुतिबलाद्भ्रमत्वमास्थेयमिति नाध्यासानुपपत्तिः। किंच न केवलं संदिग्धत्वेन अपि तु विपर्य
स्तत्वेनापि विषयत्वं। ननु स्वयंप्रकाशआत्मनि कथं संदेहादिरिति चेन्न। अनाद्यविद्यावशात्तादृशेऽप्यात्म
नि अध्यासस्यानुभवसिद्धतया स्वरूपज्ञानस्य तदविरोधित्वात्। नापि फलाभावः। यथावत्स्वरूपसाक्षा
त्कारस्येदानीं संभवेऽपि असंभावनादिशंकाकलंकितत्वेनाविद्यानिवर्तकत्वाभावेऽपि श्रवणमनननिदिध्या
सनैः शंकायां निरस्तायां ब्रह्मसाक्षात्कारेणाविद्यानिवृत्तौ प्रतिबंधकाभावात्। तथा च श्रुतिः। तरति शो
कमात्मवित्। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकिरतीह सोम्येति। तस्माद्विषयफलसंभवा

सू॰वृ॰ २ च्छास्त्रमारंभणीयम्। अत्र कृत्स्नशास्त्रप्रतिपाद्यं ब्रह्म। अध्यायैस्तु प्रतिपाद्यानि समन्वयाविरोधसाधनफ
लानि। तदुक्तं। शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः समन्वयाविरोधौ द्वौ साधनं च फलं तथेति। तत्र वि
वरणमतानुसारिणः सूत्रे कर्तव्येति पदमध्याहृत्य विधिमिति वदंति। तथाहि। द्रष्टव्य इति परमपुरुषार्थसाधनं ज्ञा
नमनूद्य तत्र द्वा सुपर्णेत्यादिना ब्रह्मवेद ब्रह्मैव भवतीत्यादिना च भिन्नाभिन्नात्मविचारयोः साधनत्वेन पक्षप्रा
प्तौ श्रोतव्य इत्यनेन प्रकृतिलक्षणया भिन्नात्मविचार एव साक्षात्कारसाधनमिति नियम्यते। एवं च नावेदवि
न्मनुते तं बृहंतं तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिना ब्रह्मणि प्रमाणांतराभावात् मनननिदिध्यासनसहकृतवि
चारितवेदांतवाक्यमेव हेतुरिति संपद्यते। तथा च विचारविध्यपेक्षिताधिकार्यादीनामाक्षेपकत्वेऽपि न्यायेन निर्ण
पार्थमिदं सूत्रं। तस्यानुवादकत्वे आनर्थक्यं स्यादिति कर्तव्यपदाध्याहारः शास्त्रे पुरुषप्रवृत्तिसिद्धये ऽक्षिसा
रूप्याय वा। एवं सति जिज्ञासेत्यत्र प्रकृत्या साध्यज्ञानमजहल्लक्षणया प्रत्ययेन चासाध्यविचारो जहल्लक्षणया
बोध्यत इति निर्बलमतं। विवरणटिप्पण्यां तु प्रकृतेः सिद्धज्ञानमात्रबोधकत्वमंगीकृत्य साध्यज्ञानेऽपि जहल्लक्षणै
वेत्युक्तं। तथा चायं सूत्रस्य श्रौतोऽर्थः साधनचतुष्टयसंपन्नस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति। ज्ञानस्य मोक्षहेतु
त्ववेदांतानां विचार्यत्वं चार्थाल्लभ्यते। तथा चोक्ताधिकारिणा मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारः कर्तव्य इ
त्यार्थिकार्थ इति। मिश्रमतानुसारिणस्तु श्रुतिसूत्रयोरेकरूपनियमाभावं विषयप्रयोजनज्ञानादेव पुरुषप्रवृत्ति
सिद्धिं श्रवणविध्यसंभवं च मन्वानाः कर्तव्येति पदं नाध्याहर्तव्यमिति वदंति तेषां मते साधनचतुष्टयसंपत्त्यनंत
रं ब्रह्मज्ञानेच्छा भवति कर्मफलस्यानित्यत्वाद् ब्रह्मज्ञानात् परमपुरुषार्थश्रवणाच्चेति श्रौतोऽर्थः। ज्ञानस्य वि
चारसाध्यत्वाद्विचारकर्तव्यताक्षिप्यत इति विचारकर्तव्यतार्थिकस्येति। अत्र विचारस्यानारंभवादिन उपायांतर २

साध्या मुक्तिरिति फलं। सिद्धांतिनस्तु विचारसंभवाद्ब्रह्मज्ञानसाध्यैव मुक्तिरिति फलफलिभावः एवं प्रथमसूत्रे
ब्रह्ममीमांसायाः प्रतिपादितत्वात्तस्या ब्रह्मलक्षणप्रमाणसमन्वयाविरोधसाधनफलविषयतयाऽनेकविध
त्वेपि प्रथमं ब्रह्मणः आधान्यात्तल्लक्षणार्थमिदं सूत्रं। जन्माद्यस्य यत इति। अस्य पूर्वाधिकरणेन संदिग्ध
त्वाद्ब्रह्म विचार्यमित्युक्तं तु जन्मादेरन्यनिष्ठत्वेन ब्रह्मणो लक्षणाभावेन स्वरूपस्यैवाभावादित्येवं रूपाक्षे
पसंगतिः। एवं पूर्वाधिकरणसिद्धांतयुक्तिमुत्तराधिकरणपूर्वपक्षयुक्तिं वा वेक्ष्य यथासंभवमाक्षेपसंगतिरत्र
नत्वोह्या। दृष्टांतप्रत्युदाहरणसंगती न सर्वत्र संभवतः। प्रकृते तु यथा संदिग्धत्वेन हेतुना ब्रह्म विचार्यं। एवं जन्मा
द्यन्यनिष्ठत्वेन हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टांतसंगतिः। यथा विचार्यत्वे हेतुर्न तथा लक्षणसद्भावे हेतुर
स्तीति प्रत्युदाहरणसंगतिः। पूर्वसूत्रस्थब्रह्मलक्षणापरीक्षणात्तदेवात्र फलं। अस्येदं विषयवाक्यं। यतो वा इ
मानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति। प्रयंतीति म्रियमाणा
नीत्यर्थः। अत्र श्रूयमाणं जन्मादिकं ब्रह्मलक्षणं न वेति संदेहः। जन्मादेः प्रपंचनिष्ठत्वेन ब्रह्मसंबंधाभावान्न लक्ष
णमिति प्राप्ते। न च सत्यं ज्ञानमनंतमित्यादिवाक्यस्थसत्यादिकं लक्षणं भवत्विति वाच्यं। अप्रसिद्धत्वात्। इति प्राप्ते
ऽभिधीयते। जगज्जन्मादिकारणत्वं ब्रह्मणस्तटस्थलक्षणं। सत्यादिकं तु ब्रह्मणः स्वरूपलक्षणं। न च लोकसि
द्धभिन्नार्थत्वात्सत्यादीनामेकब्रह्मलक्षणत्वमप्रसिद्धं इति वाच्यम्। सत्यादिपदानामखंडार्थत्वेनैकब्रह्मपर्य
वसायित्वेन सत्यादीनां लक्षणत्वसंभवादिति। सूत्रार्थस्तु। जन्म आदिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः
जन्मस्थितिभंगं समासार्थः। पूर्वसूत्रस्थब्रह्मपदमनुषंगः। तच्छब्दाध्याहारः। तेनास्य प्रत्यक्षाद्युपस्थितस्य प्रप
ञ्चस्य जन्मस्थितिभंगं यतो भवति तद्ब्रह्मेत्यर्थः। यद्यप्यव्यभिचाराज्जन्मादिकारणत्वं प्रत्येकं लक्षणं संभवति

सू.वृ. तथाप्युत्पादकत्वमात्रं निमित्तेपीत्युपादानत्वसिद्ध्यर्थं यतग्रहणं। न च लयग्रहणेनैव तत्सिद्धौ शेषवैयर्थ्यमिति वाच्यं।
३ नह्युपादानं कुलधर्मतयोच्यते। किंतु। प्रकृतिविकृतिन्यायेनाद्वितीयब्रह्मसिद्ध्यर्थं। एवं च भवतु ब्रह्मोपादानं कुलाल
वदधिष्ठाता न्य एवास्तु राज्यस्थितो राजवच्चान्य एवास्थितो कर्तास्त्विति सा शंका मा भूदिति त्रितयग्रहणं कृतमिति। एवं
जगत्कारणत्वेन ब्रह्मणः सर्वज्ञत्वमर्थादुक्तं तद्दार्ढ्यार्थिकं सर्वज्ञत्वं हेत्वंतरेण समर्थयितुमाह। शास्त्रयोनित्वात्।३। शास्त्रं वे
दस्तस्य योनित्वं तत्कर्तृत्वं सर्वज्ञकल्पवेदकर्तृत्वादपि सर्वज्ञ इत्यर्थः। अत्र सर्वज्ञत्वानिर्धारणं पूर्वपक्षफलं तन्निर्धा
रणं सिद्धांतफलं। अथवा वेदनित्यता ब्रह्मणो विश्वयोनिता नेति शंकां व्यपाकर्तुं शास्त्रयोनित्वमुच्यते। अस्मिन्पक्षे श्रो
त प्रतिज्ञयैव संगतिः। पूर्वसूत्रोक्तजगत्कारणत्वस्यैव समर्थनात्। अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वे
दः सामवेद इत्यादिवाक्यमस्य सूत्रस्य विषयः। अस्य नित्यसिद्धस्य ब्रह्मणो निश्वासइवानायासेन वेदः सिद्ध इत्यर्थः।
अत्र ब्रह्म वेदं करोति न करोति वेति संदेहः। न करोति वाचा विरूप नित्ययेति श्रुतौ नित्यत्वश्रवणात्। अस्मिन्मंत्रे विरूपेति वृ
ष्णे चोदस्व नित्यया वाचा स्तुतिं प्रेरयेति प्रार्थ्यते। अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः
प्रवृत्तय इति स्मृतेः। अतो न वेदकर्तृत्वं ब्रह्मण इति न जगद्योनित्वमिति प्राप्ते ब्रूमः। निश्वसितन्यायेन वेदोत्पत्तिश्रवणात्
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे इति सर्वे यज्ञे दृश्यमानात् यज्ञशब्दवाच्याद्ब्रह्मणो जज्ञिर इति वेदकर्तृत्वप्रती
तेः शास्त्रयोनित्वं। एतस्यानुरोधेन वाचा विरूपेत्यादिश्रुतिस्मृत्योरर्थवादत्वं। ननु वेदस्य सकर्तृकत्वे पौरुषेयत्वं उपलभ्यविरचितत्वा
[illegible]काशादिति। अस्य सूत्रस्य द्वितीयं वर्णकं। पूर्वसूत्रे जन्मादिकारणत्वकथनेन अंकुरादिकं सकर्तृकं कार्यत्वात् घटवदिति राम
अनुमानमपि ब्रह्मणि प्रमाणमस्ति सा शंका स्यात् तन्मा भूदिति इदमुच्यते। ब्रह्म न मानांतरवेद्यं कुतः शास्त्रयोनित्वात् शा ३

स्त्रं वेदो योनिः प्रमाणं यस्य तत्त्वादित्यर्थः। तं त्वौपनिषदं पुरुषं पृच्छामीत्युपनिषद्वेद्यत्वप्रतीतेः। नावेदविन्मनुते तं बृहंतमिति
श्रुत्यास्पष्टं मानांतरनिषेधाच्च। अनुमानं त्वनुकूलतर्कतया शेषः पयुज्यते न स्वातंत्र्येणेत्यर्थः अभिप्रायः। ननु यतो वाचो निवर्तंत इ
ति श्रुतेर्वेदवेद्यत्वं कथमिति चेन्न। लक्षणावृत्तिविषयत्वेन शास्त्रयोनित्वमन्याविषयत्वेनाप्रमेयत्वमित्यविरोधात्। पूर्व
सूत्रे द्वितीयवर्णके ब्रह्मणः शास्त्रप्रमाणकत्वमुक्तं तदाक्षिप्य समाधीयते तथा चाक्षेपसंगतिः फलं तु पूर्वपक्षे उपनिष
त्सु मुमुक्षुप्रवृत्त्यनुपपत्तिः। सिद्धांते प्रवृत्तिसिद्धिरिति। वेदांताः कर्मशेषभूतकर्त्रादिपराः उत नित्यशुद्धबुद्धमुक्तब्रह्मपरा
इति संशये न ब्रह्मपराः अहेयानुपादेयसिद्धब्रह्मपरत्वे निःप्रयोजनत्वसापेक्षत्वयोः प्रसंगात् तदुभयनिवारणाय कर्तृ
देवतादिप्रतिपादनद्वारा कर्मपरत्वमिति प्राप्ते राद्धांतः॥ तत्तु समन्वयात्॥ तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। तद्ब्रह्म वेदांतेषु तात्पर्ये
ण प्रतिपाद्यते कुतः समन्वयात् सम्यगन्वयः समन्वयस्तस्मादन्वयस्य सम्यक्त्वं तात्पर्यवत्त्वं वेदांतानां कर्त्रादिप्रतिपादकाः
भिन्नप्रकरणस्थत्वात् न च प्रकरणभेदादुपासनाविधिपरा इति वाच्यं। तत्त्वमस्यादीनां विधिरहितानां बहुलमुपलब्धेः स्व
रूपज्ञानादपि नायं सर्प इत्यादिवदनर्थनिवृत्तेः प्रयोजनस्य सद्भावादपि विधिशेषत्वकल्पनायोगात्। न च सापेक्षत्वं रूपादि
हीनस्य ब्रह्मणः प्रमाणांतरागम्यत्वेन तत्प्रतिपादकवेदांतानां सापेक्षत्वाभावात्तस्मादुपक्रमादिलिंगैर्वेदांतानां ब्रह्मपरत्व
मेवेति। उपक्रमादिकं च दर्श्यते। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं। आत्मा वा इदमेक एवाग्र आसीत्। तदेतद्ब्रह्मापूर्व
मनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः। ब्रह्मैवेदं पुरस्तात् ×अमृतं× इत्याद्याः श्रुतीनामयमर्थः। सदित्यस्तिता
मात्रं बोध्यते एवेत्यवधारणे। किं तदवध्रियते तदाह। इदमिति। यदिदं व्याकृतं जगत् तत् अग्रे उत्पत्तेः पूर्वं सदेवासीत् अव्या
कृतं सत्कारणात्मकं सदेवासीदित्यर्थः। हे सोम्य प्रियदर्शनेति पित्रा पुत्रः संबोध्यते। बुद्ध्यारूढस्थूलं पृथिव्यादिप्रत्युप

सू.वृ.
४

तेर्मभूत अन्यत्तु महदादि तस्मयासीदेवेतिनेत्याह। एकमिति स ततोऽन्यत्कार्यं नासीदेवेत्यर्थः। तथा मृदो घटाकारपरिणामयितृ
कुलालवज्जगन्निमित्तं सततोऽन्यदासीदित्याशंक्याह। अद्वितीयमिति। स तोपि चित्त्वं विना प्रधानवन्न हेतुतेत्याशंक्य श्रुत्यंतरमुदा
हरते। आत्मा वा इति। आप्नोतीत्यात्मा मूलकारणं वेदांतेन भागवस्त्वाभ्यर्थ्यते। अवशिष्टमुक्तार्थं। तस्यैव निर्विशेषत्वार्थं श्रुत्यंतरं
दर्शयति। तच्च द्रष्टेन इंद्रो मायाभिरिति प्रकृतात्मोक्तः। अभिधेयं ब्रह्मापेक्ष्य नपुंसकं एतदित्तत्कृतमित्यर्थः। तत्किं लक्षणकं तत्राह
पूर्वमिति पूर्वं कारणं यस्य नास्ति तदपूर्वं अकार्यमित्यर्थः। अपरं कार्यं वास्तवं नास्तीत्यनपरं अकारणमित्यर्थः। अंतरं जात्यं
तरं अंतरालं नास्तीत्यनंतरं एकरसमित्यर्थः। तथाविधमन्यदपि तटस्थमस्ति किं नेत्याह। अबाह्यमिति। बाह्यमनात्मभूतमे
वंविधमस्य नास्तीत्यबाह्यं अद्वितीयमित्यर्थः। तस्यापरोक्षतामाह। अयमिति। तत्सर्वसिध्यर्थं चित्त्वरूपत्वमाह। सर्वेति। ब्र
ह्मात्मा सर्वमनुभवतीत्यनुभूः। अनुभाव्यस्य पृथक्त्वान्नाद्वैतमित्याशंक्य श्रुत्यंतरं ब्रह्मेति। यत्पुरस्तात्पूर्वस्यां दिशि ब्रह्मे
वाविदुषां भाति तत्सर्वमिदममृतं ब्रह्मैव वस्तुतइत्यर्थः। एवं लौकिकवाक्यानां सिद्धार्थे प्रामाण्यमभ्युपगच्छतां वेदांतेषु वि
धिपरत्वं विनानपेक्षत्वं फलवत्त्वं च नेत्यभ्युतइति वदतां वेदांतेभ्यो ब्रह्मसिद्धिमनंगीकुर्वतां मतं ब्रह्मणो मानांतरागम्यत्वात्
सिद्धवस्तुज्ञानात्फललाभाच्च प्रयुक्तं। संप्रति सिद्धव्युत्पत्तिमनिच्छतामुपास्तिविधिद्वारा वेदांतेभ्यो ब्रह्मसिद्धिमिच्छतां मतमनि
रासाश्रवणकांतरमारभ्यते। तत्र वेदांता विधेयोपासनाविषयत्वेन ब्रह्मसमर्पयंति उत साक्षादिति सिद्धे व्युत्पत्त्यभावभावा
भ्यां संशये पूर्वः पक्षः। प्रत्यक्षादिलिंगाभावान्नासिद्धे व्युत्पत्तिः संभवतीति न सिद्धब्रह्मपरा वेदांताः। किंच प्रवृत्तिनिवृत्तिपरस्यैव
शास्त्रत्वेन सिद्धब्रह्मपरत्वे शास्त्रत्वमेव न संभवति निष्प्रयोजनत्वं अहं ब्रह्मास्मीति ज्ञाने सत्यपि प्रयोजनस्यादर्शनात्
पद्येवं भूतवस्तुज्ञानात्प्रयोजनं सिद्धिस्तर्हि मननादिविधानं न स्यात्। तस्मादात्मेत्येवोपासीत ब्रह्म वेद ब्रह्मैव भवति ब्रह्म
भवनकामो ब्रह्मवेदनं कुर्यात्। इत्येवमादिषु विधिषु कोसावात्मेत्याकांक्षायां तत्समर्पकत्वेन सर्वे वेदांता उपयुज्यंत उप ४

स्त.द. ४ तेर्मभूत् अन्यत्तु महदादिरत्नस्य यासीदेवेति नेत्याह। एकमिति सत्तोन्यत्कार्यं नासीदेवेत्यर्थः। तथाप्यदो घटाकारपरिणामयित
कुलालवज्जगन्निमित्तं सत्तोन्यदासीदित्याशंक्याह। अद्वितीयमिति। सतोपि चित्त्वं विना प्रधानवन्न हेतुत्वे सा शंक्य श्रुत्यंतरमुदा
हृते। आत्मा वा इति। आप्नोतीत्यात्मा मूलकारणं देशकालेन भागवस्त्वास्पर्शते। अवशिष्टमुक्तार्थं। तस्य निर्विशेषत्वार्थं श्रुत्यंतरं
दर्शयति। तच्छब्देन इंद्रो मायाभिरिति प्रकृतात्मोक्तः। अभिधेयं ब्रह्मापेक्ष्य नपुंसकं। एतदपरोक्षमित्यर्थः। तत्किंलक्षणकं तत्राह
पूर्वमिति। पूर्वं कारणं यस्य नास्ति तदपूर्वं अकार्यमित्यर्थः। अपरं कार्यं वास्तवं नास्तीत्यनपरं अकारणमित्यर्थः। अंतरं जात्यं
तरं अंतराले नास्तीत्यनंतरं एकरसमित्यर्थः। तथाविधमन्यदपि तटस्थमस्ति किं नेत्याह। अबाह्यमिति। बाह्यमनात्मभूतम
वं विधमस्य नास्तीत्यबाह्यं अद्वितीयमित्यर्थः। तस्यापरोक्षतामाह। अयमिति। तत्सर्वसिध्यर्थं चित्त्वरूपत्वमाह। सर्वेति। ब्र
ह्मात्मा सर्वमनुभवतीति सर्वानुभूः। अनुभाव्यस्य पृथक्त्वान्नाद्वैतमित्याशंक्य श्रुत्यंतरं ब्रह्मैवेति। यत्पुरस्तात्पूर्वस्यां दिशि ब्रह्मे
वाविदुषां भाति तत्सर्वमिदममृतं ब्रह्मैव वस्तुत इत्यर्थः। एवं लौकिकवाक्यानां सिद्धेर्थे प्रामाण्यमभ्युपगच्छतां वेदांतेषु वि
धिपरत्वं विनानपेक्षत्वं फलवत्वं च न लभ्यत इति वदतां वेदांतेभ्यो ब्रह्मसिद्धिमनंगीकुर्वतां मतं ब्रह्मणो मानांतरागम्यत्वात्
सिद्धवस्तुज्ञानात् फलाभावाच्च प्रयुक्तं। संप्रति सिद्धव्युत्पत्तिमनिच्छतामुपास्तिविधिद्वारा वेदांतेभ्यो ब्रह्मसिद्धिमिच्छतां मतनि
रासाय वर्णकांतरमारभ्यते। तत्र वेदांता विधेयोपासनाविषयत्वेन ब्रह्म समर्पयंतीति तत्साक्षादिति सिद्धे व्युत्पत्त्यभावाभावा
भ्यां संशये पूर्वपक्षः। प्रत्यक्षादिलिंगाभावान्न सिद्धे व्युत्पत्तिः संभवतीति न सिद्धब्रह्मपरा वेदांताः। किंच प्रवृत्तिनिवृत्तिपरस्यैव
शास्त्रत्वेन सिद्धब्रह्मपरत्वे शास्त्रत्वमेव न संभवति। नापि प्रयोजनवत्वं अहं ब्रह्मास्मीति ज्ञाने सत्यपि प्रयोजनस्यादर्शनात्
यद्येवंभूतवस्तुज्ञाने प्रयोजनसिद्धिस्तर्हि मननादिविधानं न स्यात्। तस्मादात्मेत्येवोपासीत ब्रह्मविद् ब्रह्मैव भवति ब्रह्म
भवनकामो ब्रह्मवेदनं कुर्यादित्यादिषु विधिषु कीदृशात्मेत्याकांक्षायां तत्समर्पकत्वेन सर्वे वेदांता उपयुज्यंत उप ४

सनासाध्यश्चमोक्ष इति। उच्यते।। तत्तु समन्वयात्।। तद्ब्रह्म साक्षाद्वेदांतप्रतिपाद्यं। कुतः समन्वयादित्यर्थः। न तावदु
पासनासाध्यो मोक्षः। उपासनायास्तारतम्येन तत्साध्यमोक्षस्यापि तारतम्यमनित्यत्वं च स्यात्। विधेयकर्मफलभोगदशा
यां शरीरस्यावश्यकत्वेन मोक्षेपि शरीरं स्यात्। किंच अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति मुक्तस्याप्रियाप्रिय
स्पर्शनिषेधो न स्यात्। मोक्षस्य धर्मफलत्वेन तस्यैव प्रियस्य विद्यमानत्वात्। श्रुत्यर्थस्तु वस्तुतोऽशरीरं संतमा
त्मानं वैषयिके सुखदुःखे नैव स्पृशतो वादेरवधारणादिति। ननु धर्मजन्याशरीरत्वाख्यमोक्षातिरिक्तसुखादिनिषे
धपरमिदं वाक्यमिति चेन्न। अशरीरं शरीरेष्वनवस्थेष्ववस्थितं। महांतं विभुमात्मानं मत्वा धीरो न शोचति। अप्राणो ह्यम
नाः शुभ्रः। असंगो ह्ययं पुरुष इत्यादिश्रुतिभ्योऽशरीरत्वस्य स्वाभाविकत्वावगमात्। श्रुतीनामयमर्थः। वस्तुतोऽस्थूलेश
रीरं। तत्र हेतुः शरीरेष्विति। अनवस्थेष्वनित्येषु अवस्थितं नित्यं तत्रैव हेत्वंतरं महांतमिति। आपेक्षिकमहत्त्वं वारयति विभु
मिति। मातृमंतव्यभेदमप्याह। आत्मानमिति। ईदृशमात्मानं मत्वा धीरो भवति न हि तन्मतिं विना धीरत्वं न च शोकोपलक्षि
तं संसारं नानुभवतीत्यर्थः। सूक्ष्मशरीराभावे श्रुतिरप्रमाणमिति क्रियाशक्तिमान् प्राणोऽस्य वस्तुतो नास्तीति तन्निषेधात्
प्रधानानि सार्थानि कर्मेंद्रियाणि निषिद्धानि तदभिप्रायेण हि वायुः। ज्ञानशक्तिमन्मनोऽस्य वस्तुतो नास्तीति तन्निषेधात्तथा
नानि ज्ञानेंद्रियाणि सार्थानि निषिद्धानि। अत एव शुभ्रः शुद्ध इत्यर्थः। स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवतीति स्वाप्ना
दिकृतकर्मस्वकर्तात्मेत्युक्तेऽर्थे हेतुरुच्यते। असंग इति श्रुत्या मूर्तं मूर्तांतरेण युज्यमानं स्पंदते आत्मा तु पूर्णत्वान्न मूर्तै
न स्थूलसूक्ष्मशरीरादिना केनचिद्युज्यते तेनाकर्तेत्यर्थः। एवं स्वाभाविकाशरीरत्वापरपर्यायमोक्षाख्यब्रह्मणि श्रु

स्त.र.
५

खादिसंस्पर्शाभावेऽक्षत्वं तरमपि। अन्यत्र धर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति। धर्मा
त्तत्फलाच्च दुःखात् कृतात्कार्यादकृतात्कारणात्। भूतादतीतात्। भव्यात् भाविनः। चशब्दान्न वर्तमानात्। अन्यत्रान्यदित्यर्थः।
एतत्सर्वसंस्पर्शरहितमिति यावत्। एवं भूतं यत्पश्यसि तद्वदेति मृत्युं प्रति नचिकेतसो वचनं। अपि च मोक्षस्य कर्मफलत्वे स्वर्गादिवत्
मुक्षुरूपादेयत्वं न स्यात्। ब्रह्म वेद ब्रह्मैव भवति। क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे। आनंदं ब्रह्मणो विद्वान्न बिभेति
कुतश्चनेति। अभयं वै जनक प्राप्तोऽसि। तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्। तत्र को मोहः कः शोक एक
त्वमनुपश्यतः तद्वैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेतीत्येवमादीनां ब्रह्मविद्याकाल एव मोक्षं दर्शयंतीनां
बाधश्च स्यात्। कर्मफलानां कालांतरभावित्वनियमात्। श्रुतीनामर्थस्तु यो ब्रह्म प्रत्यक्त्वेन वेद साक्षात्करोति स तद्देव ब्र
ह्म भवति तस्मिन् परमात्मनि परं कारणं अवरं कार्यं तद्रूपे तदधिष्ठाने प्रत्यक्त्वेन साक्षात्कृते सत्यस्य विदुषः अभुक्तफ
लानि कर्माणि क्षीणानि भवंति। ब्रह्मणो रूपमानंदं विद्वान् भयहेत्वभावात् निर्भयो भवति इति द्वितीयः श्लोकपूरणार्थः। हे जन
कत्वमभयं ब्रह्म प्राप्तोऽसि तत्साक्षात्कारवत्वात्। यदस्मिन्देहे ऽहं स सूर्यवत्प्रविष्टं ब्रह्म जीवात्मत्वं तदाचार्येण बोधितमात्मा
नमेव सर्वकल्पनातीतमवेत् विदितवत्। कथं अहं ब्रह्माद्वितीयमस्मीति। तस्मात् ज्ञानादज्ञानकृतासर्वद्वैतादिनिवृत्तात्तद्
ब्रह्म पूर्णात्मनावस्थितमासीत्। यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः इति यः सर्वात्मभावो विद्याव्यंग्यत्वेनोक्तः तत्रात्मनि तद्द्र
ष्टा को मोह एवं तदात्मैक्यमुपदेशेन पश्यतः शोक इत्युपलक्षितः संसारो नेति। तत्तत्पदलक्ष्यं ब्रह्मैतदात्मत्वेनावस्थितमहम
स्मीति पश्यन् अस्माद्वेददर्शनात् ऋषिर्वामदेवः परं ब्रह्माविद्याध्वंसद्वारा प्रतिपेदे ह प्राप्तवान्किलेति ह शब्दो ऽवधानेन सं श्रमः
बध्यते। स चास्मिन् दर्शने स्थितः सर्वात्मभावप्रकाशकानहं मनुरभवमित्यादीन्मंत्रान् ददर्श ददृशे तन्मंत्र ब्रह्मधीनं विषय

तत्फलं च न वेधमिति गम्यते। तथाहि। त्वं हि नः पिता यो ऽस्माकमविद्यायाः परं पारं तारयसि। श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति शो
कमात्मविदिति सोऽहं भगवः शोचामि। तं मा भगवान् शोकस्य पारं तारयतु। तस्मै मृदितकषायाय तमसः पारं दर्शयति
भगवान्सनत्कुमार इत्याद्याः श्रुतयो ब्रह्मविद्याया अविद्यानिवृत्तिद्वारा मोक्षहेतुत्वं दर्शयंति अविद्यानिवर्तकत्वं च प्रमाणव
स्तुपरतंत्रस्य ज्ञानस्यैवेति न विधेया ब्रह्मविद्या तत्फलं च न विधेयसाध्यमिति। श्रुतीनामेषोर्थः। भरद्वाजात्मजः षडृषयः पर
विद्याप्रदं पिप्पलादाख्यं गुरुं विद्यानिष्क्रयार्थमन्यद्धनमनुरूपं पश्यंतः पादयोः प्रणम्योचिरे त्वं हि नः पितेति त्वं हि नः पिता ब्र
ह्मदेहस्याजरामरस्य विद्यया जनयितृत्वात् पितरौ तु हेयदेहमात्रमेव जनयतः। जनयितृत्वमपि सिद्धस्यैवाविद्यानिरासा
दित्याह। यस्त्वमस्मानविद्यामहोदधेः पारं अपुनरावृत्तिरूपं पारं तारयसि प्रापयसि विद्याप्लवेनेति। श्रुतं ह्येवेत्यादि तारयत्वित्यंत
मुपक्रमस्य शेषमुपसंहारस्थमिति भेदः। मे मया भगवद्दृशेभ्यः भगवत्तुल्येभ्यः श्रुतमेव यदात्मवित् शोकं मनस्तापमकृतार्थबु
द्धिं तरतीति सोऽहमनात्मवित् शोचामि अतस्तं मां शोचंतं शोकसागरस्य पारमंतं तारयतु प्रापयतु भगवानात्मज्ञानोडुपेनेति। नार
देन प्रेरितः सनत्कुमारः तस्मै नारदाय मृदितकषायाय वैराग्यादिना क्षालितरागादिसमस्तदोषायायोग्याय तमसः अविद्या
याः पारं परमात्मतत्त्वं दर्शितवानिति। ननु ब्रह्मैव विधेयं मुमुक्षोः फलस्य सत्त्वात्। न च ब्रह्मणोऽकारकत्वादविधेयता
ब्रह्मवेदेत्यादिना कर्मत्वप्रतीतेरिति चेन्न। फलासंभवस्योक्तत्वात् ब्रह्मणः कृतिसाध्यत्वाभावेन विधेयत्वानुपप
त्तेश्च। नापि कर्मत्वं किं विदिक्रियाकर्मत्वं उतोपासनाकर्मत्वं नाद्यः अन्यदेव तद्विदितादथो अविदितादधि। येनेदं सर्वं वि ये
जानाति तं केन विजानीयादित्यादिना विदिक्रियाकर्मत्वप्रतिषेधात्। न द्वितीयः। तदेव त्वं ब्रह्म विद्धि नेदं यदिदमुपासत
इत्युपासनाकर्मत्वप्रतिषेधात्। अस्यार्थस्तु तद्ब्रह्म विदिताज्ज्ञाताद् अन्यदेव अथो अपि अविदितात्कारणादप्यन्यदेव
अधि उपरि इत्यन्यदेव। येन प्रमात्रा इदं सर्वं वस्तु लोको जानाति तं केन करणेन जानीयात् करणस्य हि

यविषयत्वात् ज्ञातुर्ज्ञेयत्वानुपपत्तेः। तस्मान्न ज्ञाता ज्ञेयः किंसाक्षीति। यद्वाचानभ्युदितं येन वागभ्युद्यत इति अविषयत्वमु
क्तात् देवेति प्रमाणादेः कल्पनामपोह्य आत्मभूतं ब्रह्म महत्तममिति त्वं विद्धि यदुपाधिविशिष्टं देवतादिकमिदमि
त्युपासते जनाः नेदं तद्ब्रह्म विद्धीत्यर्थः। इतश्च ब्रह्मणोऽकर्मत्वं गम्यते। यस्यामतं तस्य मतं मतं यस्य न वेद सः। अवि
ज्ञातं विजानतां विज्ञातमविजानतां। न दृष्टेर्द्रष्टारं पश्येः। न विज्ञातेर्विज्ञातारं विजानीयाः। इत्यादिश्रुतयोऽविषयत्वबो
धयंति। यस्य ब्रह्मणाऽमतं अविषय इति निश्चयः तस्य तन्मतं ज्ञातं यस्य तु मतं विषयतया ज्ञातं तु ब्रह्म स नेति धी
र्नासौ तद्वेद भेदधीमत्वात्। एवमेवेति नियमार्थमनुवदति अविज्ञातमिति श्रुतिः। विषयतयाऽज्ञातमेव ब्रह्म स
म्यक् ज्ञातं विशेषज्ञानवतां। ज्ञातमेवं विषयतया यथावदजानतामिति। बुद्धिमान् विषयतया न जानाति मूर्खस्तु विषयतया
जानातीति तात्पर्यार्थः। दृष्टेश्चक्षुर्जन्यायाः कर्मभूतायाः द्रष्टारं स्वभावभूतनित्यदृष्ट्या व्याप्तारं दृश्यमानो न या दृष्ट्या
न पश्येः। विज्ञातेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारं साक्षिणं तयैव वेद्यया विज्ञात्या न विजानीया इति उद्दालकं प्रति याज्ञ
वल्क्यवचनं। नन्वविषयकत्वे कथं शास्त्रप्रमाणकत्वमिति चेन्न। तत्कृताविद्याभ्रांतिध्वंसरूपातिशायवत्त्वेन तद्वि
षयत्वादिति। किंच न तावद्विधेयक्रिययोत्पाद्यत्वं मोक्षस्य स्वरूपत्वेन। नादित्वात् मोक्षो नोत्पाद्यः। नविकार्यः अ
विकार्योऽयमुच्यत इति श्रुतेः। नाप्याप्यः नित्याप्तत्वात्। नापि संस्कार्यः। निर्गुणत्वेन गुणाधानलक्षणसंस्काराभा
वात्। नापि दोषापनयः संस्कारः संभवति। ब्रह्मणि क्रियाया अभावेन स्वनिष्ठक्रियया दोषापगमाऽयोगात्। अन्यनि
ष्ठक्रियया अन्यत्र संस्काराऽयोगात्। न च देहनिष्ठक्रियया तस्यैव संस्कार्यत्वं तत्फले भोक्तृत्वं चेत्येवगमात्तत्
था च श्रुतिः। आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति। आत्मीयं शरीरमात्मेत्युच्यते। तथा च शरीरादिसंयु

क्रमात्मानं भोक्तेति मनीषिण आहुरित्यर्थः॥ यद्वा आत्मा भोक्तेत्याहुः इति संबंधः॥ इंद्रियेत्यादि क्रियाविशेषणं
आत्मनि दोषाभावाच्च न दोषनिवृत्तिः संस्कारः संभवति निर्गुणत्वेन निर्दोषत्वे च श्रुतिरेव मानं। तथाह। एको देवः सर्वभूते
षु गूढः सर्वव्यापी सर्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च। स पर्यगाच्छु
क्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमिति। अनयोर्मंत्रयोरयमर्थः। मूर्तित्रयस्य ब्रह्मरुद्र[illegible]नो भेदं
व्याह। एक इति। जात्यं प्रत्याह। देव इति ज्ञानघन इत्यर्थः। आदित्यादिवैषम्यमाह। सर्वेति। तर्हि किमिति न प्रतीय
ते तत्राह। गूढ इति। अनादिमायया छन्न इत्यर्थः। तत्तद्भूतावच्छिन्नत्वेन परिच्छिन्नत्वं नेत्याह। सर्वव्यापीति। न भोक्तृ
त्वं वारयति। सर्वभूतांतरात्मेति। सर्वेषु भूतेष्ववस्थितस्य तत्तत्क्रियाकर्तृत्वं नास्तीत्याह। कर्माध्यक्ष इति। सर्वकर्म
साक्षीत्यर्थः। सर्वभूतेष्वित्यादिना भूतानां पृथगुक्तेः सद्वितीयत्वमाशंक्याह। सर्वेति। सर्वेषां भूतानामधिवासोऽधिष्ठानं
न च कल्पितमधिष्ठानादर्थांतरमित्यर्थः। न केवलं कर्मणामेवाध्यक्षः अपि तु तत्कर्तॄणामपीत्याह। साक्षीति। साक्षित्वे
हेतुमाह चेतेति चित्त्वभाव इत्यर्थः। केवलो द्वयवर्जितः अद्वितीयः निर्गुणो ज्ञानादिगुणरहितः चकारो दोषाभावस
मुच्चयार्थः। गुणदोषांतराभावं मंत्रांतरं स पर्यगादिति। सः यस्तु सर्वाणि भूतानीति प्रकृतात्मा परितः समंतादगात्
सर्वतो गत इत्यर्थः। शुक्रमित्यादिशब्दाः पुल्लिंगत्वेन नेयाः स इत्युपक्रमात्। शुक्रो दीप्तिमान्। अकायो लिंग
शरीररहितः। अव्रणः अक्षतः। अस्नाविरः अनाशी। आभ्यां स्थूलदेहाभाव उक्तः। शुद्धो रागादिगुणरहितः
अपापविद्धो धर्माधर्मविधुर इति। तस्मान्न संस्कार्यो मोक्षः। तस्मान्न कर्तव्यविधिशेषतया ब्रह्मोपदेशसंभवः

बृ.उ.
७

यत्तु सिद्धे प्रत्यक्षादिलिंगाभावात् न शक्तिग्रह इति। तत्र प्रवृत्तिनिवृत्ती एव लिंगमिति न निर्बन्धः पुत्रस्ते जात इत्यादौ हर्ष
दिलिंगेनापि शक्तिग्रहसंभवात्। यत्तु प्रत्यक्षादिपरस्यैव शास्त्रत्वमिति तदपि न। हितशासनाद्धि तानां शास्त्रत्वोप
पत्तेः। नापि फलाभावः। ब्रह्मात्मसाक्षात्कारस्य मोक्षफलत्वात्। तादृशसाक्षात्कारार्थं मननादिसार्थक्यं चेति न क
थंचिदपि विधिप्रवेशः। ब्रह्मात्मावगतेः प्रत्यक्षादिनिरपेक्षाया मोक्षहेतुत्वं श्रुतिरपि दर्शयति। आत्मानं चेद्विजानी
यादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति। अयं परमात्माहमस्मीत्यपरोक्षतया यदि
कश्चित्पुरुषो जानीयात् आत्मसाक्षात्कारदौर्लभ्यद्योतनी चेच्छब्दः स्वातिरिक्तात्मनः किंफलमिच्छन्कस्य वा
पुत्रादेः कामाय फलाय तत्फलाभेन शरीरं संतप्यमानमनु तदुपाधिः सन्संज्वरेत्तप्येतेति। नन्वशरीरत्वाख्यमोक्ष
स्य स्वाभाविकत्वं सिद्धवत्कृत्य न धर्मजन्यत्वमित्युक्तं तदयुक्तं। शरीरदशायामशरीरत्वस्याभावेन धर्मजन्यत्वसं
भवादिति चेन्न। शरीरत्वस्य मिथ्यात्वेनाशरीरत्वस्य स्वाभाविकत्वात्। तथा च ब्रह्मविद्विषया श्रुतिः। तद्यथाहिनिर्ल्व
यनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज इति* एव* सच
अ क्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इवेति च। अनया श्रुत्याहं ब्रह्मास्मीति
ज्ञाने सत्यपि मुक्तिर्न दृश्यते किंतु यथापूर्वं संसारित्वमेवेति शंकापि परिहृता भवति। श्रुत्योरर्थस्तु। अत्र ब्रह्म सम
श्नुत इति पूर्ववाक्ये जीवन्मुक्तिरुक्ता। स जीवन्मुक्तोऽदेहत्वोऽपि पूर्ववत्संसारीत्यत्र दृष्टांतमाह। तद्यथेति। तत्र तेत्र जी
वन्मुक्तदेहे। इदमादेहदृष्टांतो यथेति। यथा लोके अहिनिर्ल्वयनी सर्पविमुक्तत्वक् वल्मीके प्रत्यस्ता प्रक्षिप्ता ममता राम:
पूर्वमिव सर्पेणात्मत्वेनागृहीता वर्तते। एवमेवेदं विदुषः शरीरं प्रागिवात्मत्वेनागृहीतं तिष्ठतीत्यर्थः। त्वचा सा ७

म्यंशरीरस्योत्क्रासर्पसाम्यंविदुषोदर्शयति।अयेति।तथार्थकोऽयंशब्दः।यथाप्रत्यस्तांत्वंचमहिरहमितिनाभिम
न्यते तथायंजीवन्मुक्तोदेहस्थोपिनतत्राहंधियमादधातिइ।त्यशरीरः अशरीरत्वादेवामृतः।देहाभिमानवतोहिमृतिः।नि
रुपाधिकः सन्प्राणितिजीवतीतिप्राणः साक्षी।सचब्रह्मैवतत्तेजोविज्ञानज्योतिः।अनयास्थूलदेहस्यमिथ्यात्वंदर्शयि
त्वासचक्षुरचक्षुरिवेत्यादिश्रुतिर्लिंगशरीरस्यमिथ्यात्वंदर्शयति।वस्तुतोऽचक्षुरपिबाधितचक्षुराद्यनुवृत्त्यास
चक्षुरिवेत्यादियोजना।तस्माद्वेदांताः साक्षादेवब्रह्मणिसमनुगतानविधिद्वारेतिसिद्धंब्रह्मस्वतंत्रमेवशास्त्रप्रमाण
कमिति॥ एवंचतुर्भिः सूत्रैः सर्वज्ञंसर्वशक्तिजगत्कारणंवेदांतप्रतिपाद्यंब्रह्मेत्युक्तंवस्तुतस्तच्चेतनमचेतनंवेतिसंश
यः।तत्रसांख्याः कूटस्थब्रह्मणोज्ञानक्रियाशक्त्यभावान्नजगत्कारणत्वंप्रधानस्यतुतत्सत्वाज्जगत्कारणत्वंसत्व
गुणमादायज्ञानशक्तिमत्वंत्रिगुणत्वात्क्रियाशक्तिमत्वं।ब्रह्मणएकत्वान्नक्रियाशक्तिः।तस्मात्सर्वज्ञंसर्वशक्तिप्र
धानमेवतदनुवादकावेदांताइतिवदंति।तन्मतनिरासार्थमिदंसूत्रमारभ्यते॥ ईक्षतेर्नाशब्दं॥ सांख्यपरिकल्पितंप्रधा
नंजगत्कारणंनभवतितत्रहेतुरशब्दमिति।हेतुगर्भविशेषणमेतत् अशब्दत्वात् अवेदप्रमाणकत्वादित्यर्थः।वेद
प्रमाणकत्वेहेतुः ईक्षतेरिति।धातुवाचकेक्षितिशब्दोलक्षणयाधात्वर्थेक्षणपरः।ईक्षितृत्वश्रवणादित्यर्थः।अस्यवा
क्षेपसंगतिः फलंचप्रधानैक्यसंपदुपास्तिः पूर्वपक्षे।सिद्धांतेतुब्रह्मैक्यप्रमितिरितिविवेकः।एवंहिश्रूयतेसदेवसो
म्येदमग्रआसीदेकमेवाद्वितीयंइत्युपक्रम्यतदैक्षतबहुस्यांप्रजायेयेति।तत्रप्रधानस्यैवोपक्रमेईक्षितृत्वश्रवणंवि
रुध्येतईक्षणस्यचेतनधर्मत्वात्।नचब्रह्मणोज्ञानक्रियाशक्त्यभावः।अविद्यामहिम्नासर्वस्याप्युपपत्तेः।सत्त्वप्रधा
नपरमाणुप्रेरकईश्वरः सद्वितीयईक्षितेतिपातंजलादिमतनिराकरणार्थंश्रुतावेकमद्वितीयमितिपदंच।उपादानस्य

स॰वृ॰ ८ चेतनत्वार्थं तदैक्षतेति। उपादानत्वार्थं बहु स्यामिति। एवमेतरेयश्रुतिः। आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्
स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतेतीक्षणपूर्विकामेव सृष्टिमाचष्टे। मिषत् चलत्। सत्ताक्रांतमिति यावत्।
एवं सर्वत्रेक्षणपूर्वकसृष्टिश्रवणात् ब्रह्मैव जगत्कारणमिति। नन्वीक्षणमात्रेण न ब्रह्म जगत्कारणमिति निश्चयः। तत्तेज
ऐक्षत ता आप ऐक्षंतेत्यचेतनयोरप्यप्तेजसोरीक्षणश्रवणात् तत्सामभिव्याहारात् प्रधानेपि ईक्षतिर्गौण इति प्राप्ते उच्यते॥ गौणश्चे
न्नात्मशब्दात्॥ अप्तेजसोरिव प्रधाने ईक्षतिर्गौण इति चेन्न। कुतः। आत्मशब्दात् आत्मशब्दश्रवणादित्यर्थः। सदेव सोम्येदमग्र आसीदित्यु
पक्रम्य तदैक्षत बहु तत्तेजोसृजतेति तेजोबन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदीक्षितृ तानि च तेजोबन्नानि देवताशब्देन परामृश्याह। से
यं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतिः। तत्र यद्यचेतनं प्रधानमेवेक्षितृ तत्तदा
सेयं देवतेति तस्यैव परामर्शात्तदात्मत्वेन जीवकीर्तनमनुपपन्नं स्यात्। आत्मा हि स्वरूपं न च चेतनो जीवः अचेतनस्यात्मा भ
वितुं जीवविषय आत्मशब्द उपपद्यते स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति श्वेतके
तोर्जीवस्यात्मतादात्म्योपदेशात्। न हि चेतनस्याचेतनाभेदे शंकाभूत्कः। न चाप्तेजसोर्गौणेक्षणश्रवणात् तत्प्रायपठित
त्वेन तदैक्षतेत्यादौ गौणेक्षणमेवेति वाच्यं। संशयस्थल एव प्रायपाठस्य निश्चायकत्वात् प्रकृते तु गौणमुख्ययोर्गौणस्याज
घन्यत्वेन संशयाभावात्। अत एव भगवान् जैमिनिः विशये प्रायदर्शनादिति संशये प्रायदर्शनस्यैव निश्चायकतामाह। अ
प्तेजसोस्तु नैव मुख्यत्वे किंचित्कारणमस्तीति गौणमीक्षणं कूलं पिपतिषतीतिवत्। अस्यार्थस्तु आकाशाद्वायुश्च सृष्टोत
स्तदेवेसु प्रक्रांतं सच्छब्दवाच्यं ब्रह्म तेजः सृष्टवदिति। प्रकृतः सदात्मा परामृश्यते सेयमिति सन्निहितेक्षितृपरामर्शो देवते राम
ति अलौकिकमुक्तमीक्षणमभिनयति हंतेति सृष्टिवाक्ये नोक्तानि तेजोबन्नानि परामृशति इमा इति। सूक्ष्मभूतास्तिस्रो ८

देवतामयासृष्टा इत्यर्थः। सृष्टत्वेनापरोक्षत्वाद्देवतानामिदंप्रयोगः। तासां व्यवहारयोग्यत्वं कथमिति अत आह। अनेनेति। पूर्वसृष्ट
नुभूतेन प्राणधृतिहेतुना जीवेनात्मना सद्रूपेणोक्तदेवतासर्गानंतरं नामरूपे चेति विस्पष्टमासमंतात्करवाणीति पराधिदेवतेक्षि
तेत्यर्थः। यः स दारुप्यः स एषोणिमा अणुरित्यर्थः। दुर्ज्ञेय इति यावत्। ऐतदात्म्यं एतदात्मकं भावभवित्रोरभेदात्। परमसूक्ष्मंस
र्वात्मकं सदेव। स सत्यं पारमार्थिकं तत्त्वं। स एव सर्वस्यात्मा निरूपचरितस्वरूपं हे श्वेतकेतो त्वं च संसारी नासि किंतु तदेव ब्रह्मेत्यक्षर
योजना। नन्वात्मशब्दोपि प्रधाने गौणोस्तु नानार्थकतया मुख्यो वेत्यत आह॥ तन्निष्ठस्य मोक्षोपदेशात्॥ न प्रधानमात्मशब्दवा
च्यं। तत्सत्यं स आत्मेति प्रकृतं सत् तद्दृणि मानमादाय तत्त्वमसि श्वेतकेतो इति श्वेतकेतोश्चेतनस्य मोक्षयितव्यस्य तन्निष्ठ
तामुपदिश्य आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति मोक्षोपदेशात्। यद्यचेतनं प्रधा
नं सच्छब्दवाच्यं मुमुक्षुं श्वेतकेतुं चेतनं तत्त्वमसीति शास्त्रं ग्राहयेत्। हे श्वेतकेतो चेतनोऽचेतनोऽसीति तदा शास्त्रप्रामाण्या
दचेतनोस्मीति ध्यायमानो मोक्षाद्धीयेत। अनर्थं चेयात्। तथा च शास्त्रमुन्मत्तप्रलापो भवेत्। तस्मान्निष्ठं तस्मादात्मशब्द
श्चेतनपर इति। ऐक्यापरोक्षप्रतिबंधकनिवृत्तिमाह श्रुतिराचार्यवानिति उक्तप्रमित्या सर्वबंधनिवृत्या देहादिवृत्तिरपि
स्तिं प्राप्ता आप्रारब्धकर्मपातं तस्यानुवृत्तिमाह। तस्येति। कथं तर्हि प्रारब्धकर्मनिवृत्तिरित्याशंक्य भोगादेवेत्याह यावदिति
प्रारब्धध्वस्तावपि कथं देहादिध्वंस इत्याशंक्याप्रतिबंधादित्याह अथेति। उत्तमपुरुषस्तूभयत्र प्रथमपुरुषे छांदसत्वादिति
न तु स्थूलारुंधतीन्यायेन प्रधानोपदेशद्वारा आत्मोपदेशोऽयमस्तु तत्राह॥ हेयत्वावचनाच्च॥ यद्यनात्मैव प्रधानमात्मशब्दवा सत्
च्य आत्मा तत्त्वमसीति इहोपदिष्टं स्यात्तत् उपदेशश्रवणादनात्मतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षुः शास्त्रं त
स्य हेयत्वं ब्रूयात्। यथारुंधतीं दिदर्शयिषुः तत्समीपस्थतारां याहेयत्वं ब्रूते तद्वदित्यर्थः। एकविज्ञानात्सर्वविज्ञानोपक्रमविरो
धसमुच्चयोर्थश्चशब्दः। तथाहि। उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः

सू॰वृ॰ सआदेशो भवतीति यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सोम्य
९ स आदेशो भवतीति वाक्ये एकविज्ञानात्सर्वविज्ञानोपक्रमः श्रूयते स विरुध्येत प्रधानज्ञानात्तद्विकारज्ञानेपि भोक्तृवर्गज्ञाना
संभवादिति। श्रुत्यर्थस्तु हे श्वेतकेतो येन श्रुतेन स्वतोन्यदश्रुतमपि श्रुतं भवति येन मतेन तर्कितेनान्यदमतमपि मतं येन विज्ञा
तेनान्यदपि विज्ञातं भवति तमादेशं आदिश्यत इत्यादेशः शास्त्राचार्योक्तिगम्यं वस्तु प्राक्ष्यः पृष्टवानसि त्वमाचार्यमिति पितुर्वा
क्यार्थः। अन्यज्ञानादन्यन्न ज्ञेयमिति पुत्रो ब्रूते कथं नु भगव इति। कार्यस्य कारणानन्यत्वमित्याह यथेति ज्ञातेपि मृत्पिंडेक
यं तद्विकारधीरित्यत आह वाचेति। यो विकारः स वागालंबनमुच्यते परं न वस्तुतोस्तीत्यर्थः। तत्र हेतुर्नामधेयमिति। नाममात्र
मेव नार्थोस्तीत्यर्थः। तर्हि मृद्घटयोरभेदे घटनाशे मृदोपि नाशः स्यादत आह मृत्तिकेति। घटोक्तिभिन्नत्वेन निर्वक्तुं न शक्यत
इति सततोऽभिन्न एव मृत्सु घटोऽपि घट इति न दोष इति। सदेव सोम्येति सच्छब्दवाच्यं प्रधानमिति तोपि न भवतीत्याह। स्वाप्यया
त्॥ तदिव सच्छब्दवाच्यं कारणं प्रस्तुत्य श्रूयते। यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मा
देनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीत्येषा श्रुतिः पुरुषस्य लोकप्रसिद्धं स्वपिति नाम निर्वक्ति। स्वशब्देन सच्छब्दवाच्य आत्मा
परामृश्यते स्वं प्रति अपीतो भवति लीनो भवति। अपि पूर्वस्यैतेर्लयार्थत्वात् सुषुप्त्यवस्थायामुपाधिकृतविशेषाभावात्स्वात्मनि
प्रलीन इवेति स्वमपीतो भवतीत्युच्यते। तथा च सूत्रार्थः स्वस्मिन् प्रकृते सच्छब्दवाच्यात्मनि अप्ययात् लयश्रवणादिति। तत्र प्र
दि प्रधानमेव सच्छब्देनोच्येत तदा चेतनोऽचेतनमप्येतीति विरुद्धं स्यात् श्रुत्यंतरं च। तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किं
चन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति सुषुप्त्यवस्थायां चेतनेऽप्ययं दर्शयति। राम
अतो यस्मिन्नप्ययः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगत्कारणमिति किंच॥ गतिसामान्यात्॥ गतेः सर्वेषु वेदांतेषु चेतन ९
कारणावगतेः समत्वादित्यर्थः। न हि क्वचिदपि विरुद्धमुपलभ्यते कुत्रचिद्ध्यचेतनकारणं कुत्रचिच्चेतनमिति। ----

किंतु सर्वत्र चेतनमेव कारणमुपलभ्यते। यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः सर्वे प्रा
णा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति। आत्मन एवेदं सर्व
मिति। आत्मन एष प्राणो जायत इत्याद्याः श्रुतय आत्मन एव कारणत्वं दर्शयंति। आत्मशब्दश्चेतनपर इत्युक्तं। किंच। श्वेता
सी श्वतरे च॥ स च ज्ञ इत्येनैव सर्वज्ञ ईश्वरो जगतः कारणमिति श्रूयते। श्वेताश्वतराणां मंत्रोपनिषदि ज्ञः कालकालो गुणी सर्वविद्य इति
सर्वज्ञं ईश्वरं प्रकृत्य धियो कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति। यथाग्नेरित्यादेरयमर्थः। स्फुलिंग प्रसं
गार्थं ज्वलत इति विप्रतिष्ठेरन् नाना ?तित्वेन दिशो विप्रसृताः स्युः प्राणाश्चक्षुरादयः यथायतनं यथागोलकं विप्रतिष्ठंते
विविधमुत्क्रमंतीति यावत्। प्राणेभ्योऽनंतरमादित्याद्या देवास्तदनुग्राहकास्तेभ्योऽनंतरं लोक्यंत इति लोका विषया भवंतीत्यर्थः
प्राणो हिरण्यगर्भः ज्ञः सर्वज्ञः स कारणमिति कारणत्वोक्तेः सर्वज्ञता विशेषतः सर्वविद्यः स सर्वज्ञः कारणं तस्य सर्वेश्वरत्वमाह
करणेति। करणानींद्रियाणि तेषामधिपाः स्वामिनो जीवास्तेषामधिपः परमेश्वरः। तस्य सर्वहेतुत्वमाह। न चेति। [illegible]जीवा
न्तरं तीश्वरत्वं हिरण्यगर्भस्याप्यस्तीति ततो विशेषमाह। न चाधिप इति तस्य नियंता स्वयं न स्वस्य नियंतास्ति। इत्यर्थः। तस्मात्सर्व
ज्ञं ब्रह्म जगत्कारणं न चाचेतनं प्रधानमन्यद्वेति सिद्धं॥ अस्मिन्नधिकरणे सूत्राणि षट्॥ न न्वेवमथात इत्यारभ्य श्रुतत्वाच्चे
त्येतदंतैः सर्वेषां वेदांतानां सर्वज्ञसर्वशक्तिब्रह्मपरत्वं समर्थितं किमपरमवशिष्टं यदर्थमुत्तरसूत्रसंदर्भ इति। उच्यते। निर्विशे
षब्रह्मणः स्वरूपेणोपदेशायोगात् किंचिदुपाध्युपहितत्वेनोपदेश इति वक्तव्यं तत्र कस्मिन्वाक्ये उपाधिर्विवक्षितः कस्मिन्वा
क्ये नेत्याकांक्षायां तद्विवेचनार्थमुत्तरसूत्रसंदर्भोऽर्थवान् इति। तथैव सविशेषं च ब्रह्म श्रूयते। यत्राहि द्वैतमिव भवति तदितर इत
रं पश्यति। अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं सर्वाणि रूपाणि वि
चित्य धीरः नामानि कृत्वाभिवदन्यदास्ते इत्यादि सविशेषवाक्यानि। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्। यत्र

सू॰ट
१०

नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं । अमृतस्य परं सेतुं दग्धेंधनमि
वानलं । स एष नेति नेत्यात्मा अस्थूलमनण्वित्यादि निर्विशेषवाक्यानि ब्रह्मणोऽद्वितीयरूपतां दर्शयंति । तत्र कानिचित्क्रम
मुक्त्यर्थान्युपासनानि कानिचिदभ्युदयाद्यर्थानीति बोध्यं । अक्षरार्थस्तु । यत्र यस्यां खल्वविद्यावस्थायां तु सममपि द्वैतं सदिव
भाति तत्रेतरः संसारी संनिहितं पश्यति । दृश्यादिगोचरमुपाधिमद्वस्तु भवतीत्यर्थः । यस्मिन्नात्मनि द्रष्ट्रादिचक्षुरादिना
नुसंधत्ते तदल्पं । परिच्छिन्नं उपहितमितियावत् । भूम्नोप्यस्य विशेषांतरमाह । यो वा इति । अथेति द्योतितो विशेषोऽनेन प्रक
टितः । सर्वज्ञ ईश्वरो नामरूपादिकं विश्वं निर्माय तत्र प्रविश्य जीवरूपेणाभिवदनादि कुर्वन्निव तिष्ठते अंतर्यामी तं विद्वानिहै
वामृतो भवतीत्यर्थः । यत्र यस्यां विद्यावस्थायामस्य विदुषः सर्वं कर्त्रादि आत्मातिरेकेणासदेवासीत्तत्र केन करणेन कं विषयं
को वा कर्त्ता पश्येदित्याक्षेपाद्व्यवहार्यमनोपाधिकं तत्त्वमित्यर्थः । यत्र भूम्नि स्थितो विद्वानन्यत् द्रष्टव्यं चक्षुषा न पश्यति अ
न्यच्छ्रोतव्यं श्रोत्रेण न शृणोति न चान्यन्मंतव्यं ज्ञातव्यं मनसा बुध्या वानु ते जानाति स भूमा दृश्याद्यगोचरो निरतिशयमह
त्वसंपन्नः परमात्मेत्यर्थः । निष्कलं निरंशं अत एव निष्क्रियं निष्क्रियत्वादेव शांतं परिणामरहितं । निरवद्यं रागादिरहितं धर्मा
दिरहितं निरंजनमित्यर्थः । यथा महाद्रुमयः सेतुर्नदीकुल्यादिपरकूलप्राप्त्युपायस्तथा संसारसागरस्य परं ब्रह्मस्थलप्राप्तस्य
अमृतस्य वाक्ये ध्येयबुद्ध्याभिव्यक्तं सत्साधनं सेतुवदवस्थितं । वाक्योत्थज्ञानस्य कथं नाशस्तत्राह । दग्धेंधनोग्निः शाम्यतीत
आत्मज्ञानमपीत्यर्थः । इतिरिदमर्थो । इदं न इदं नेति निषेधावधिभूत आत्मेत्यर्थः । तथा सविशेषनिर्विशेषपरं वाक्यांतरमपि । भू
नमन्यत्स्थानं संपूर्णमन्यत् इति । अस्यार्थः । निष्प्रपंचादन्यदुपास्यं गुणानां स्थानेन्यत्परिच्छिन्नं ततोन्यत्स्थानं निष्प्रपं
चमुक्तोपस्थ्यं त्रिधा परिच्छेदशून्यं सच्चिदानंदात्मकमिति । एवं च यत्र सगुणवाक्ये गुणविवक्षा तत्रोपासना भवति यत्र तुग्र
यमेणोपि गुणो न विवक्षितस्तद्वाक्यं ज्ञेयब्रह्मपरमेवेति निर्णयार्थमुत्तरसंदर्भ इति फलितं ॥ आनंदमयोभ्यासात् ॥ पूर्वोक्ता राम
वत्सर्ववेदांतानां निर्गुणब्रह्मपरत्वमुक्तं गतः सिद्धं तत्स गुणवाक्यदर्शनेनापोद्य सगुणवाक्यविचारः प्राप्तः तमेपोदद १०

अधिकरणं निर्गुणविचारात्मकमारभ्यते। यद्यपवादापवादकत्वादस्य सगुणविचारानंतर्यमुक्तं तथापि पूर्वाधिकर
णे संशयाभावात्प्रायपाठेन निश्चायक इत्युक्ते। अन्योंतर आत्मा आनंदमय इत्यत्र मयटो विकारे प्राचुर्ये च मुख्यत्वात्तुल्यु
दाहरणलक्षणसंगतिरस्तीति सगुणविचारात्प्रागिदमारभ्यते। अत्संशये विकारप्रायपाठो निश्चायकोस्तीति पूर्वाधिकरणसि
द्धांतयुक्त्यभावेन प्रवृत्तत्वात्॥ पूर्वपक्षे जीवस्यानंदमयत्वेनोपास्तिः फलं। सिद्धांते निर्गुणब्रह्मप्रमितिरिति सिद्धांतगत्या।
एकदेशिमते तत्प्रियत्वोपास्तिरिति विवेकः। तैत्तिरीयके अन्नमयप्राणमयमनोमयविज्ञानमयाः कोशाश्चतुष्टयानंतरं तस्माद्वा एतस्मा
द्विज्ञानमयात् अन्योंतर आत्मानंदमय इति श्रूयते तत्र संशयः किमानंदमयशब्देन सत्यं ज्ञानमिति प्रकृत्यपरब्रह्मोच्यते उत अन्नम
यादिविकारवत् ब्रह्मणोर्थांतरं जीव इति। तत्रान्नमयादिविकारप्रायपाठात् तस्य प्रियमेव शिरः मोदो दक्षिणः पक्ष इत्यादिना प्रिया
द्यवयवयोगात्तस्यैष एव शारीर आत्मेति शारीरत्वश्रवणाच्च जीव इति प्राप्तं। तस्य पूर्वोक्तस्य विज्ञानमयस्यैष एव आनंदम
य एव शारीर आत्मेतीत्यर्थः। एवं प्राप्त उच्यते॥ आनंदमयोभ्यासात्॥ आनंदमयः परमात्मा भवितुमर्हति कुतः अभ्यासा
त् आनंदमयशब्दस्य ब्रह्मण्येव बहुकृत्वोभ्यासादित्यर्थः। तथाहि आनंदमयं प्रस्तुत्य रसो वै सः इति तस्यैव रसत्वमुक्त्वा
ते रसं ह्येवायं लब्ध्वानंदी भवति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयाति। सैषानंदस्य मीमां
सा भवति एतमानंदमयमात्मानमुपसंक्रामति। आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति आनंदो ब्रह्मेति व्यजानादिति ब
हुधाभ्यासः श्रूयते। न चानंदपदस्यैवाभ्यासो नानंदमयस्येति वाच्यं। वसंते वसंते ज्योतिषा यजेतेत्यत्र ज्योतिःपदस्य ज्योतिष्टोमप
रत्ववत् आनंदपदस्यानंदमयपरत्वात्। अक्षरार्थस्तु। रसः सार आनंद इत्यर्थः। अयं जीवः पूर्णानंदः सर्वसाक्षी सर्वप्रेरकोनस्या
न्ये नर्हि प्राणादेरचेतनस्य चेष्टा नयुक्तेत्याह। को हीति। अन्यात् जीवेत् यत् यदि आनंद इत्यनंतरं प्रेरक इति शेषः। आनंदम
यत्वादपि परमानंदत्वमित्याह। एष हीति। आनंदयतीत्यर्थः। स्वयं धनी परं धनिनं करोति लोके तद्वत्स्वयमानंदः परमानंद
यतीति। यत्तु प्रायपाठादानंदमयस्य विकारित्वमिति तन्न। स्थूलारुंधतीन्यायेनान्नमयादिविकारान्मुख्यात्मप्रदर्शनस्यात्मेशा

सू॰वृ॰ नार्थत्वेनानंदमयस्य सर्वांतरत्वात्स एवात्मेत्यवधारणात् अनंतरमन्यस्यात्मनो नुपदेशात्सर्वांतरत्वमवगम्यते। विज्ञानकोश
११ वन्नादेरौपाधिकप्रियाद्यवयवयोगो न विरुध्यते। ब्रह्मणो न्नमयादिकोशपरंपरया शारीरत्वमप्युपपन्नमेव तस्मादानंदमयः परमा
त्मा॥ विकारशब्दान्नेति चेन्न प्राचुर्यात्॥ ननु नानंदमयं ब्रह्म कुतः विकारार्थकमयट्प्रत्ययात्। ब्रह्मणश्चानंदविकारत्वानुपपत्तेरि
ति चेन्न। कुतः। प्राचुर्यात्। मयटः प्रकृते आनंदप्राचुर्यवाचकत्वादित्यर्थः। मयटः प्राचुर्यार्थकत्वे हेत्वंतरमाह तद्धेतुव्यपदेशा
च्च॥ न मानंदं प्रति ब्रह्मणो हेतुत्वव्यपदेशादित्यर्थः। एष ह्येवानंदयातीति ब्रह्मण आनंदहेतुत्वं व्यपदिश्यते यो न्यानानंदय
ति स प्रचुरानंद इति प्रसिद्धं॥ इतश्चानंदमयः परमात्मा। मांत्रवर्णिकमेव च गीयते। ब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानम
नंतं ब्रह्म यो वेद निहितं गुहायामित्यस्मिन्मंत्रे सर्वांतरं ज्ञेयत्वेनोक्तं तन्मांत्रवर्णिकं ब्रह्म। अन्योंतर आत्मानंदमय इति गीयते
मंत्रब्राह्मणयोरेकार्थ्यात्। यद्यप्यत्र व्याख्यानव्याख्येयभावाभावेन न मंत्रब्राह्मणभावः। अथापि ब्राह्मणस्य व्याख्यानरूप
त्वेनाख्येयमंत्रं प्रत्युपायत्वात् प्रकृते प्युपेयोपायभावोस्तीति मांत्रवर्णिकमित्युक्तं॥ इतश्चानंदमयः परमात्मा न जीव इत्याह
॥ नेतरोनुपपत्तेः॥ ईश्वरादितरो जीवो नानंदमयः कुतः अनुपपत्तेः। सोकामयतेति सृष्टेः पूर्वमीक्षणं। बहु स्यां प्रजायेयेति स्र
ष्ट्रात्मकत्वं। स तपोतप्यत स तपस्तप्त्वा इदं सर्वमसृजतेति सृष्टिहेतुत्वं च श्रूयते तत्सर्वस्यानुपपत्तेरिति सूत्रार्थः। जीवज्ञान
स्य शारीरसाध्यत्वादीक्षणानुपपत्तिर्बोध्या। श्रुतौ तपःशब्द ईक्षणपरः। किंच॥ भेदव्यपदेशाच्च॥ नानंदमयो जीवः कुतः जीवानंदम
यो भेदेन व्यपदिश्यमानत्वादित्यर्थः। तथा श्रूयते। रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीत्यानंदमयस्य लब्धव्यत्वेन
जीवस्य लब्धृत्वेन भेदव्यपदेशः। न हि लब्धैव लब्धव्यो भवति नन्वानंदमयशब्देन प्रधानमुच्यतां तत्राह॥ कामाच्च नानुमाना राम
पेक्षा॥ अनुमीयत इत्यनुमानं अनुमानैकगम्यं प्रधानमित्यर्थः। आनंदमयत्वेन कारणत्वेन वा प्रधानस्य नापेक्षानुस्वीका ११
धि रः। कुतः कामात्। आनंदमयाधिकारे सोकामयतेति कामयितृत्वश्रवणादित्यर्थः। न ह्यचेतने कामः संभवति ईक्षतेर्नाशब्दमि

स्यत्र निराकृतमपि प्रधानं गतिसामान्यप्रपंचनाय पुनर्निराकृतमिति बोद्धव्यं ॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ इतश्च न जीवे प्रधाने
वानंदमयशब्दः यस्मात्तस्मिन्नानंदमये प्रकृत आत्मनि प्रबुद्धस्य जीवस्य तद्योगं तदात्मना योगस्तद्योगस्तद्भावापत्तिर्मुक्तिरित्यर्थः ॥ तं शा
स्ति शास्त्रं तस्मादित्यर्थः । यदा ह्येवैष एतस्मिन्नदृश्ये नात्म्ये निरुक्ते निलयने ऽभयं प्रतिष्ठां विंदते अथ सो ऽभयं गतो भवति । यदा ह्येवैष ए
तस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति शास्त्रं । अस्यार्थः । यदा यस्यामैक्यज्ञानावस्थायामेष विद्वानेतस्मिन्ब्रह्मणि पंचीकृ
तभूतपंचकेन तत्कार्येण समष्टिस्थूलदेहेन विराजा दृश्यशब्दार्थात्मकेन तादात्म्यशून्ये दृश्यभिन्ने स्वसंबंधितयाध्यस्तेंद्रियजातेन
अपंचीकृतभूतकार्येणात्म्यशब्दार्थेन तादात्म्यहीने ऽनात्म्ये निरूप्योत्पद्यंत इति निरुक्तानि भूतसूक्ष्माणि तेभ्यो भेदवर्जिते निरुक्ते
निर्विशेषलयस्थाने निलये सकलकार्यसंस्काराधाराविद्यातद्भेदशून्ये प्रकर्षेणास्थितिं पुनरावृत्तिरहितां लभते तदाभयं यथास्या
दित्युक्तं व्यनक्ति । अथेति । ज्ञानफलमुक्त्वाज्ञानाभावे दोषमाह श्रुतिः यदा हीति । यद्यस्मिन्नानंदमयब्रह्मणि अल्पमप्यंतरं अता
दात्म्यरूपं पश्यति तदा संसारभयान्न निवर्तत इत्यर्थः ॥ इदं शास्त्रं प्रधानपरिग्रहे जीवपरिग्रहे वा न घटत इति तस्मादानंदम
यः परमात्मेति सिद्धं ॥ इदं त्वेकदेशिमतं । भगवत्पादास्तु अभ्यस्यमानानंदपदस्यानंदमये लक्षणा । अन्योंतर आत्मानंदम
य इत्यत्रानंदमयपदस्य प्राचुर्यार्थकत्वे ब्रह्मणि दुःखलवप्रसंगः स्यादिति प्रचुरानंदे लक्षणा । ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मपदस्य
अवयवविशेषलक्षणेति मुख्यत्रितयलंघनं विकारप्रायपाठपरित्यागश्चैकदेशिमते स्यात् । स्वपक्षे तु ब्रह्म पुच्छमित्यत्र पुच्छ
पदस्यावयवप्रायपाठपरित्यागमात्रमिति मन्वाना आनंदमय इति मयट् विकारार्थक एवेति वदंतः सूत्राण्यन्यथा व्याचख्युः । अ
धिकरणरचना तु ब्रह्म पुच्छं प्रतिष्ठेत्यत्र किमानंदमयावयवत्वेन ब्रह्मोच्य ते उत स्वप्रधानत्वेनेति ब्रह्मपुच्छशब्दाभ्यां संशयः
ईक्षत्यधिकरणे समन्वयाभावात् प्रायपाठस्य न निश्चायकत्वमिह पुच्छपदस्यावयवाधारत्वयोर्लक्षणासाम्यात् संशये

सू.वृ.
१२

अवयवप्रायपाठस्यनिर्बाधकत्वमितिगत्युदाहरणसंगतिः। प्रयोजनंचपूर्वमुक्तं। तत्रपुच्छशब्दादवयवत्वेप्राप्तेउच्यते॥ आनं
दमयोभ्यासात्॥ आनंदमयशब्देनानंदमयवाक्यस्थं ब्रह्मपुच्छं प्रतिष्ठेत्यत्रविद्यमानब्रह्मपदमुपलक्ष्यते। तद्ब्रह्मपदंप्रधानब्र
ह्मपरं। कुतः। अभ्यासात्। असन्नेवसभवति असद्ब्रह्मेतिवेदचेत्। अस्तिब्रह्मेतिचेद्वेदेत्यादौब्रह्मपदस्याभ्यासादितियत्तुपुच्छ
शब्दादवयवपरत्वमितितत्राह॥ विकारशब्दान्नेतिचेन्नप्राचुर्यात्॥ विकारशब्दादवयवपरपुच्छशब्दान्नतत्समानाधिक
रणंब्रह्मपदंस्वप्रधानब्रह्मपरमितिचेन्न। कुतः। प्राचुर्यादवयववत्त्वोपपत्तेः। प्राचुर्यंचात्रावयवप्रायप्रयोगः। एवंचान्नम
यादीनांपुच्छानांनवयवानुक्त्वानंदमयस्यापीतरावयवोक्तौपुच्छस्येवब्रह्मणःसंनिधानादपुच्छमपिब्रह्मपुच्छमित्युक्तं। [illegible]
नहिब्रह्मणोमुख्यंपुच्छत्वमानंदमयस्यपरमात्मत्वपक्षेपियुक्तं। स्वंप्रतिस्वस्यपुच्छत्वानुपपत्तेः तस्माद्ब्रह्मपुच्छवत्पुच्छं सर्वाधिष्ठा
नंप्रतिष्ठापरायणंलौकिकस्यानंदजातस्याधारइत्यर्थः। सर्वाधारत्वात्प्रतिष्ठापदसमभिव्याहाराद्आधारलक्षणामुक्तेति। इतश्च
पुच्छशब्देनाधारोलक्ष्यतइत्याह॥ तद्धेतुव्यपदेशाच्च॥ तस्यब्रह्मणोविकारजातंप्रतिहेतुत्वेन इदं सर्वमसृजतेतिवाक्येव्यपदेशाद्
इत्यर्थः। नहिस्वविकारमानंदमयंप्रतिब्रह्मणोवयवत्वंसंभवति मुख्यतइतिस्वप्रधानंब्रह्मपुच्छंज्ञेयत्वेनविवक्ष्यतइति। मांत्रवर्णि
कमेवचगीयते॥ यत्सत्यंज्ञानमित्यादिमंत्रवर्णप्रकाशितंब्रह्मैतद्ब्रह्मपुच्छंप्रतिष्ठेतिब्राह्मणवाक्येस्वप्राधान्याद्गीयते। मंत्रब्राह्म
णयोरेकार्थ्यादित्यर्थः। इतश्चानंदमयोत्रनप्रतिपाद्यः। तस्यैवेत्यधिकप्रियाद्यवयवयोगेपुच्छत्वानुपपत्तेरित्याह॥ नेतरोनुपपत्तेः॥
ब्रह्मपुच्छंप्रतिष्ठेत्यत्रब्रह्मस्वप्रधानं। नेतरः। अनुपपत्तेः। ब्रह्मणोवयवत्वे वयव्यानंदमयोत्र [illegible] प्रतिपाद्यइतिवक्तव्यम्। न
ह्येतत्संभवति। सावयवस्य [illegible] ग्निमवाक्योक्तस्य कृत्वाद्यनुपपत्तेरित्यर्थः। अतोब्रह्मस्वप्रधानं। इतश्चात्रपुच्छवाक्येब्रह्मस्वप्रधानमि
त्याह॥ भेदव्यपदेशाच्च॥ रसंह्येवायंलब्ध्वानंदीभवति। अयमानंदमयोजीवोरसशब्दितंब्रह्मानंदंप्रतिविंबितंलब्ध्वानंदीभवती राम
तिभेदव्यपदेशादित्यर्थः। इतश्चब्रह्मपुच्छकआनंदमयोत्रनप्रतिपाद्यइत्याह॥ कामाच्चनानुमानापेक्षा॥ काम्यइतिकामआनंदः १२

स॰सू॰
पु॰१२

तस्य ब्रह्मत्वदृष्टेर्नानुमानेनानंदमयस्य ब्रह्मत्वमपेक्षितव्यं। विकारार्थकमयड्विरोधादित्यर्थः। आनंदमयशब्दो ब्रह्मपरः। आनंदशब्दत्वात्। आनंदो ब्रह्मेत्यत्र आनंदशब्दवत्। इतोपि ब्रह्मपुच्छवाक्येन ब्रह्मप्रधानमित्याह। अस्मिन्नस्य च तद्योगं शास्ति॥ ॥अस्मिन् पुच्छवाक्योक्ते ब्रह्मणि प्रबुद्धस्यानंदमयस्य जीवस्य यदा ह्येवैष एतस्मिन्नित्यादिश्रुत्यंतद्योगं मुक्तिं शास्तीत्यर्थः। तस्मादानंदमयस्यात्राः प्रतिपाद्यत्वात् पुच्छब्रह्मैव स्वप्रधानं निर्विशेषं ज्ञेयमितिसिद्धं॥ ॥अंतस्तद्धर्मोपदेशात्॥ ॥पूर्वत्र ब्रह्मपदमानंदमयपदमानंदपदाभ्यासश्रौतिमुख्यत्रितयात्मकवद्धप्रमाणवशात्। निर्गुणं ब्रह्म यथा तद्वद्रूपवत्वादिबद्धप्रमाणात्संसारी। हिरण्मयः पुरुषोस्तीतिपूर्वसिद्धांतयुक्त्या पूर्वपक्षोत्थानात् दृष्टांतरूपावांतरसंगत्या पूर्वसिद्धनिर्गुणब्रह्मसमन्वयापवादकमिदमारभ्यते। फलं च पूर्वोत्तरपक्षयोरुपास्तिरेव पादसमाप्ति पर्यंतं। छांदोग्ये श्रूयते। अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै भ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतमथाध्यात्ममथ य एषोंतरक्षिणि पुरुषो दृश्यत इत्यादि। उपास्तिप्रस्तावार्थोऽथशब्दः। य एष शास्त्रसिद्धः आदित्यमंडलमध्यवर्ती स्थानाद्यवयवकथनं परमात्मन उपास्त्यर्थं द्रष्टव्यं। हिरण्मयः ज्योतिर्मयः तत्रावहितधियामनुभवं प्रमाणयति। दृश्यत इति। हिरण्यपदं ज्योतिःपरं स्ववर्णपदमपि प्रशस्तवानस्वार्थं चक्षुषोर्विशेषमाह। तस्येति। कपेर्मर्कटस्य आसः पृष्ठभागोत्यंततेजस्वी तत्तुल्यं पुंडरीकं तथात्यंततेजस्वि तथास्य देवस्य अक्षिणी नेत्रे। ध्यानार्थमेव नामकरोति। तस्येति। नाम निर्वक्ति। स इति। उदितः उद्गतः सकार्यसर्वपापास्पृष्टश्चेत्यर्थः। ध्यानफलमाह। उदेतीति। अधिदैवतं देवतामधिकृत्योपास्तिवाक्यमित्यर्थः। अधिदैवध्यानोक्त्यनंतरं आत्मानं देहमधिकृत्यापि तद्युक्तिरित्याह। अथेति। एतादृशः स्थानद्वयस्थो पुरुषमधिकृत्य रूपवत्वश्रुत्या सर्वपापास्पर्शश्रुत्या च संशयः। किमयं पुरुषो विद्याकर्मातिशयवशात् प्राप्तोत्कर्षः कश्चित्संसारी उत नित्यसिद्धः परमात्मेति किं तावत्प्राप्तं। संसारीति। कुतः। हिरण्य

राम
१२७

१२

१२

ऋक्सामऋगित्यादिरूपवत्त्वश्रवणात्। अक्षिपुरुषस्यापि तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति रूपवत्त्वश्रवणात्। ये चामुष्मात्परांचो
लोकास्तेषां चेष्टे देवकामानां चेत्यादित्यपुरुषस्य स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेत्यक्षिपुरुषस्य चैश्व
र्यमर्यादाश्रवणाच्च। नहि परमात्मनो मर्यादावदैश्वर्यमुक्तं। स एष सर्वेश्वर इति श्रुतेः। स आदित्यपुरुषः अमुष्मादादित्यादूर्ध्व
गानां लोकानामीशिता देवकामानां देवभोगानां चेत्यर्थः। तस्मात्वाक्ष्यादित्ययोरंतःपुरुषः स एतस्मादक्ष्णोर्वाग्गतानां लो
कानामीशिताक्षिपुरुषः मनुष्यभोगानां चेत्यर्थः॥ परमेश्वर इति प्राप्ते उच्यते॥ ॥अंतस्तद्धर्मोपदेशात्॥ ॥य एषोंतरादित्ये य एषो
ऽन्तरक्षिणि इति श्रूयमाणः परमेश्वर एव न संसारी। कुतः। तद्धर्मोपदेशात्। तस्य परमेश्वरस्य ये धर्मास्तेषामस्मिन्नुक्ते
उपदेशादित्यर्थः। तद्यथा॥ तस्योदिति नामेत्यादिना सर्वपाप्मविरहेणादित्यपुरुषस्य नामोक्तं तदेव नाम। अक्षिपुरुषस्या
तिदिशति यन्नाम तन्नामेति। तत्सर्वपाप्मराहित्यं ब्रह्मधर्मः। एवं सैव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मेति। ऋगाद्यात्मत्वलि
गं प्रतिश्रुतिः। तच्च सर्वात्मकब्रह्मण एवोपपद्यते। सैव ऋगित्यादेरयमर्थः। तच्छब्देन पुरुषपरामर्शः विधेयापेक्षया
स्त्रीलिंगव्यपदेशः। उक्थं शस्त्रविशेषस्तत्साहचर्यात्साम स्तोत्रं उक्थादन्यत्तद्यजुस्तद्ब्रह्म त्रयो वेदा इति। एवं सर्वगानं
गीयमानत्वं निर्दिष्टं। तद्य इमे वीणायां गायंत्येतमेव ते गायंतीत्यादौ। हिरण्यश्मश्रुकेशादिकं मायिकं परमेश्वरस्य लोका
नुग्रहार्थमुपपद्यत इति न विरोधः। तस्मादक्ष्यादित्ययोरंतः परमात्मा। किंच॥ ॥भेदव्यपदेशाच्चान्यः॥ ॥आदित्याक्ष्यो
रंतःश्रूयमाणपुरुष आदित्यशरीराभिमानिनो जीवादन्यः। कुतः भेदव्यपदेशात्। आदित्यशरीराभिमानिनो जीवादन्य
स्य परमात्मनोंतर्यामिब्राह्मणेंतर्यामिण आत्मनो भेदेन व्यपदेशादित्यर्थः। य आदित्ये तिष्ठन्नादित्यादंतरो यमादित्यो न वेद
यस्यादित्यः शरीरं य आदित्यमंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यादिश्रुत्यंतरे तयोर्भेदव्यपदेशाद्द्वाप्यांतर
श्रुतिश्रुत्या प्रत्यभिज्ञानात् परमेश्वर एवाक्ष्यादित्ययोरुपास्य इति सिद्धं॥ ॥आकाशस्तल्लिंगात्॥ ॥पूर्वमव्यभिचारिब्रह्म
लिंगेनापहतपाप्मत्वादिना रूपवत्त्वादिकमन्यथानीतं। इह तु लिंगादाकाशशब्दश्रुतिरन्यथानेतुं न शक्यते लिंगापेक्ष

रा.सू.
१२

न्याकृतेः प्रबलत्वादिति प्रत्युदाहरणसंगत्येदमारभ्यते। छांदोग्ये श्रूयते। अस्य लोकस्य का गतिरित्याकाश इति
होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आकाशं प्रत्यस्तं यंत्याकाशो ह्येवैभ्यो ज्यायानाकाशः प
रायणमिति तत्रोभयत्राकाशशब्दस्य प्रयोगदर्शनात्संशयः। किं भूताकाशोत्राकाशशब्देनाभिधीयते उत परं ब्रह्मे
ति यदेष आकाश आनंदो न स्यादित्यादौ द्विवेद ब्रह्मण्याकाशशब्दप्रयोगः भूताकाशे रूढ इति। विषयवाक्यार्थस्तु।
शालावत्यनामकः कश्चन ऋषिर्जैवलिराजानं पृच्छति अस्येति। सर्वस्य प्रपंचस्य किमधिकरणमिति प्रश्नार्थः।
जैवलिरुत्तरमाह। आकाश इति। कथंभूत आकाशः सर्वं जगत्तिष्ठतीति तत्राह। सर्वाणीति। भूताकाशव्यावृत्तये
हेत्वंतरमाह। आकाशो हीति। तत्रैव हेत्वंतरमाकाश इति। अयं सिद्धांतार्थः। तत्रेदं भूताकाश इति युक्तं। न च वा
क्यशेषानुपपत्तिः। आकाशाद्वायुरित्यादौ तस्यापि वाय्वादिकारणत्वश्रवणात् तस्माद्भूताकाश इति प्राप्ते ब्रूमः॥
आकाशस्तल्लिंगात्। आकाशशब्देन ब्रह्मणो ग्रहणं युक्तं कुतः तल्लिंगात् तस्य ब्रह्मणो यल्लिंगं महाभूतस्य सृष्ट्या
दिकं तस्मिन्वाक्ये दृष्टत्वादित्यर्थः। नन्विदं भूताकाशस्यापि वाय्वादिकारणत्व[illegible] दृष्टमिति चेन्न
कारणब्रह्मणो। परिग्रहे आकाशादेव सर्वधारणं सर्वाणीति च भूतविशेषणं आकाशं प्रत्यस्तं यंतीति कारणे लयप्रद
र्शनं चानानुकूलं स्यात्। ज्यायस्त्वपरायणत्वप्रदर्शनं च ब्रह्मण्येव समंजसं श्रुत्यंतरं च स्पष्टं ब्रह्मण एव परायणत्वं
दर्शयति। विज्ञानमानंदं ब्रह्म रातेर्दातुः परायणमिति रातेर्धनस्य दातुः यजमानस्य रातिरिति पाठे रातिर्वधुरित्यर्थः
किंच। स एष परोवरीयानुद्गीथः स एषोऽनंत इत्युद्गीथे आकाशस्य रूपं देवतार्थान् परत्वादीनुपसंहरति जैवलिः। न भूता
काशे न युज्यते। न हि तस्यानंत्यं संभवति श्रुतौ परत्वं गुणत उत्कृष्टत्वं वरीयस्त्वं कालतो वस्तुतश्च अपरिच्छिन्नत्वं
अनंतत्वं देशतोऽपरिच्छिन्नत्वं द्रष्टव्यं। ननु लिंगात् श्रुतिर्बलीयसीति तत्राह। सजेदं कंकुलस्यार्थ इति न्याये न वकीनामनवकाश

राम
१२

श्रुतीनामनुग्रहाय एकस्याकाशश्रुतेर्बाधस्य युक्तत्वात्। तस्मादाकाशशब्देन ब्रह्मैवात्र देवतोद्गीथ उपास्य इति
सिद्धं॥ ॥अत एव प्राणः॥ ॥अत्रवातिदेशात्वात्पृथक्संगत्यपेक्षा पूर्वत्राकाशश्रुतेरव्यभिचारिब्रह्मलिंगोपबृंहितत्वा
द्बाधो युक्तः इह तु श्रूयमाणसंवेशनादिलिंगस्य प्राणेपि संभवेनाव्यभिचारिब्रह्मलिंगसद्भावाभावात् प्राणश्रुतिबाधो
न युक्त इति प्रत्युदाहरणसंगतिः। तत्रैवाकाशवाक्यानंतरं श्रूयते। उद्गीथे। प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वा
न्प्रस्तोष्यसि मूर्धा ते व्यपतिष्यतीति। कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्यु
ज्जिहते सैषा देवता प्रस्तावमन्वायत्तेत्यादि। अस्यार्थः। उद्गीथाधिकारे प्रासंगिकप्रस्तोतारं भीतः सन् चाक्रायणं पप्रच्छ
कतमेति तस्य प्रतिवचनं प्राण इति। मुख्यप्राणवायुं वक्तुमुद्गीथ इति उक्तं। कश्चिदृषिश्चाक्रायणनामा धनाय राज्ञो यज्ञं
त्वा ज्ञानवैभवं स्वस्य प्रकटयन् प्रस्तोतारमुवाच हे प्रस्तोतः या देवता प्रस्तावं सामभक्तिविशेषं अन्वायत्ता अनुगता सप्र
स्तोता भीतः सन् चाक्रायणं पप्रच्छ कतमेति तस्य प्रतिवचनं प्राण इति। मुख्यप्राणवायुं व्यावर्तयति। सर्वाणीति। संविशंति
लीना भवंति लयकाले। अभ्युज्जिहते जन्मकाले प्राणमभिलक्ष्योद्गच्छंतीति। तत्र प्राणबंधनं हि सोम्य मनः प्राणस्य प्रा
णमित्यादौ ब्रह्मणि प्राणशब्दप्रयोगात् प्राणवायौ च प्रसिद्धतरत्वात् संशयः। किमत्र प्राणशब्देन ब्रह्माभिधीयते उत वा
युविकार इति। मनःशब्दलक्षितं तत्साक्षि चैतन्यं प्राणे परस्मिन्नैक्येन स्थितमित्यर्थः। प्राणस्य पंचवृत्तेर्वायुविकारस्य
प्राणं सत्तास्फूर्तिमात्मानं ये विदुस्ते ब्रह्म जानंतीत्यर्थः। तत्र प्रसिद्धिबलात् वायुविकार इति प्राप्ते आकाशन्यायमतिदिशति
भगवान्सूत्रकारः। अत एव प्राण इति। अत एव पूर्वोक्तात् लिंगादि हेतोरेव प्राणशब्दो ब्रह्मेत्यर्थः। सर्वाणि ह वा इमानि भूतानि
प्राणमेवाभिसंविशंतीत्यादिना महाभूतसंवेशनादिकं ब्रह्मलिंगं प्राणवाक्ये श्रूयते। न च यदा वै पुरुषः स्वपिति प्राणं तर्हि वा
गप्येति प्राणं चक्षुः प्राणं मनः प्राणं श्रोत्रं स यदा प्रबुध्यते प्राणादेवाधिपुनर्जायंत इति श्रुत्या वायु विकारेपि संवेशनादिश्रव

स्॰सू॰ १४ १ तद्यतिवाच्यं। नह्यिवात्तत्र महाभूतसंवेशनादि श्रूयते किं त्विंद्रियसंवेशनादिकमेव। अस्यार्थस्तु तर्हि तस्यां सुषुप्तावस्थायामित्यर्थः। अथा
कृपदमनुक्तकर्मेंद्रियलक्षकं। श्रोत्रं धींद्रियाणामुपलक्षणं तस्मादनेनान्यथासिद्धत्वात् ब्रह्मलिंगात् प्राणशब्दवाच्यं ब्रह्मैवोपास्यं प्रस्ताव
देवतेति सिद्धं॥ ॥ज्योतिश्चरणाभिधानात्॥ ॥पूर्वं ब्रह्मवाक्ये कुलिंगसत्वाद्भवतु ब्रह्मपरता इह त्वस्मिन्वाक्ये तदभावान्न ब्रह्म
परतेति प्रत्युदाहरणसंगत्या इदमारभ्यते। छांदोग्ये श्रूयते। अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनु ष
त्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति। अस्यार्थः। गायत्र्युपाधिब्रह्मोपास्त्यनंतरोत्पन्नर्थोऽथशब्दः। अ
तो दिवो द्युलोकात्परतः परतः परस्ताद्यज्ज्योतिर्दीप्यते तदिदमिस्योदरे ज्योतिषि अध्यस्यते। कुत्र तद्दीप्यते तदाह। लोकेष्विति। तेपृष्ठ
संतित आह। विश्वत इति विश्वस्मात्प्राणिवर्गादुपरीत्यर्थः। विश्वशब्दस्य कतिपयार्थकत्वं व्यपनयति। सर्वत इति। सर्वस्मादूर्ध्वादिलो
क्वात्सर्वसंसारमंडलादुपरीत्यर्थः। उत्तमानविद्धं तेषु व्यक्तेऽनुत्तमास्तेषु तथापि कथं तेषामुत्कर्षस्तत्राह तेत्तमेष्विति। इदं शब्दार्थे स्फुर
यतीति यदिति तत्र ज्योतिःशब्दस्य भौतिके तेजसि ब्रह्मण्यपि च प्रयोगात्संशयः। किमिह ज्योतिःशब्देनादित्यादिकं तेज अभिधीयते उत
ब्रह्मेति किं तावत्प्राप्तं युक्तं। भौतिकं ज्योतिरिति कुतः प्रसिद्धत्वात्। अतो दिव इत्यादिना मर्यादाश्रवणाच्च। न हि सर्वव्यापिनो ब्रह्मणो
मर्यादादिकं युक्तं तस्माद्भौतिकं ज्योतिरिति प्राप्ते ब्रूमः। ज्योतिश्चरणाभिधानादिति। अत्र ज्योतिःशब्दवाच्यं ब्रह्मैव कुतः चरणाभिधा
नात् पादाभिधानादित्यर्थः। तथा हि। ज्योतिर्वाक्यात् पूर्ववाक्ये चतुष्पाद्ब्रह्म निर्दिश्यते तावानस्य महिमा अतो ज्यायांश्च पूरुषः पा
दोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति। एतदर्थस्तु। गायत्री वा इदं सर्वं भूतमित्यत्र भूतपृथिवीशरीरहृदयवाक्प्राणैः षड्विधा चतुष्प
दा गायत्रीति यदुक्तं तद्गायत्र्युपाधिब्रह्मणो महिमा विभूतिः। यावानयं प्रपंचः स्वयं पूरुषस्ततो ज्यायान् तदेवाह पादइति। सर्वा
णि भूतान्यस्यैकः पादः एकदेशः त्रिपादमृतं दिवि द्योतनवति स्वात्मनि स्थितमिति। एवं च यदतः परइत्यत्र यच्छब्दस्य सर्वनामत्वेन
प्रसिद्धार्थवाचकत्वात् पूर्ववाक्ये द्युसंबंधित्वेन प्रसिद्धं ब्रह्मैवापि द्युसंबंधाद्यच्छब्देन प्रत्यभिज्ञापरइत्यादिनाकृतं ब्रह्म
णो मर्यादादिकं उपासनार्थमित्युक्तं ज्योतिःशब्दो ब्रह्मण्यपि प्रसिद्धो वेदांतेषु तस्मादिह ज्योतिःशब्दवाच्यं ब्रह्म॥ ॥छंदोभि १४
धानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं॥ ॥यदुक्तं पूर्वं गायत्र्याख्यछंदउपाधिकं ब्रह्मणा उक्तं आत् तदत्र

स्यमित्याम्नायत इति तन्न गायत्री वा इदं सर्वं भूतं यदिदं किंचेति वाक्ये छंद एवेदमिति गायत्र्याख्यछंदसः प्रकृतत्वात्तस्यै
व पादोस्य सर्वा भूतानीति भूतपाद्व्यपदेशेन ब्रह्मण इति पूर्ववाक्ये छंद एवाभिधीयते न ब्रह्मेति चेन्न। गायत्र्याख्यछं
दोद्वारेण तदनुगते ब्रह्मणि सर्वात्मकत्वं प्रतिपाद्य गायत्री वा इदं सर्वमित्यादिना। न हि अक्षरसंनिवेशमात्राया गायत्र्याः
सर्वात्मत्वं समंजसं तस्माद्गायत्र्यां विकारे यदनुगतं ब्रह्म तदेव गायत्री वा इदं सर्वमित्यादिना प्रतिपाद्यत इति। निष्कृष्टार्थ
स्तु छंदोभिधानाद्गायत्र्याख्यछंदस एव पूर्ववाक्ये प्रकृतत्वान्न ब्रह्मणः प्रकृतत्वमिति चेन्न। कुतः। तथा छंदोद्वारेणत
दुते ब्रह्मणि चेतोर्पणस्य चित्तसमाधानस्य निगदादभिधानात् तत्र दृष्टांतः तथाहि दर्शनं अन्यत्रापि विकारद्वा
रेण ब्रह्मण उपासनं दृश्यत इति दर्शनं दृष्टमित्यर्थः। एतं ह्येव बह्वृचा महत्युक्थे मीमांसंते। एतमग्नावध्वर्यव
एतं महाव्रते छंदोगा इति। एतदर्थस्तु एतमात्मानं ऋग्वेदिनो महत्युक्थे प्रधाने शस्त्रे तदनुगतमुपासते। यजुर्वे
दिनोग्नौ क्रतौ साम। वेदिनो महाव्रताख्यक्रतौ तदनुगतं ब्रह्मानुसंदधत इत्येतरेये दृष्टमित्यर्थः। एवं च गायत्रीशा
ब्दो ब्रह्मलक्षक इति पूर्ववाक्ये ब्रह्मानिर्दिष्टं। यद्वा गायत्रीशब्दो ब्रह्मणि गौणः तथा च सूत्रे सिद्धांतभागस्यायमर्थः
यथा गायत्री षडक्षरैः पादैश्चतुष्पादा एवं ब्रह्मणो हि दृश्यो पात्स्यपि चतुष्पादिति गायत्रीशब्देनाभिधीयते चतुष्पात्व
गुणयोगात् तथा गायत्रीसादृश्येन चेतोर्पणस्य ध्यानस्य निगदाद्विधानादिति। तथाहि निदर्शनमिति। छंदोभिधा
यिशब्दस्य सादृश्यादन्यत्र प्रयोगे दृष्टांतः। तथाहि ते वा एते पंचान्ये पंचान्ये दशसंतस्तत्कृतमित्युपक्रम्याह सैषा
विराडिति। अस्यार्थः। संवर्गविद्यायामधिदैवमग्निसूर्यचंद्रंभासि वायौ लीयंते। अध्यात्मं प्राणे वाक्चक्षुःश्रोत्रम
नांसीत्युक्तं। ते वायुना सह आधिदैविका आध्यात्मिकेभ्यः प्राणादिभ्योन्ये तथा प्राणेन सह वागादयः पंच आधिदैविकेभ्यो
न्ये। एवं ते सर्वे दशसंतः कृतमित्युच्यंते। कृतापरपर्याय चतुरायकनामद्यूतगतचतुरंकवच्चत्वारः पदार्थाः प्रकृतेसीति

सू.र
१५

त्र्यंका एव त्रयः द्व्यंकायवत् द्वौ एकांकायवदेकश्च एवं प्रकृते दशके सर्वं तिर्भवंति जये सर्वजयो भवति तायया कृते त्रेतादि
संज्ञानि त्र्यंकायादीनि जितानि भवंतीति तद्वत्। तत्र चतुरायकापरपर्यायचतुरंकायनामकः कृतस्य कृतमिति संज्ञा। सच
चतुरंकायो दशात्मकः। चतुर्षु अंशेषु त्रयाणां त्रिषु द्वयोः द्वयोरेकस्मिन्नंतर्भावात् [illegible] तथाच दशात्मसंख्यासा
म्याद्दशसंख्यादयः कृतमित्युच्यंते। एवमेव दशाक्षरा विराडिति श्रुत्या विराण्णामकछंदसो दशात्मकत्वाद्धृद्य [illegible] विराट्शब्दप्रयो
ग इति यथा तद्वद्ब्रह्मणि चतुष्पादिति श्रुत्या चतुष्पात्त्वसाम्याद्गायत्रीशब्दप्रयोग इति [illegible] तात्पर्यार्थः। तस्मात् पूर्ववाक्ये ब्रह्मैव
निर्दिष्टं न छंद इति सिद्धं॥ ॥भूतादिपादव्यपदेशोपपत्तेश्चैवं॥ ॥इतश्च गायत्रीवाक्ये ब्रह्मैव निर्दिष्टं न छंदः [illegible]
त्यभ्युपगंतव्यं इत्येवं शब्दार्थः। कुतः भूतादिपादव्यपदेशोपपत्तेः। भूतपृथिवीशरीरहृदयैश्चतुष्पदा गायत्री [illegible]
ब्रह्मण्येवोपपत्तेरित्यर्थः। नह्यक्षरसंनिवेशरूपगायत्र्यां भूतादिपादव्यपदेशः संभवति। किंच। ते वा एते पंच ब्रह्मपुरुषा इ
ति श्रुतिः पूर्वप्रकृतब्रह्मणः प्रकृतत्वे संगच्छते। तथाहि। गायत्र्याख्यब्रह्मणो हार्दस्योपास्यांगत्वेन द्वारपालत्वादिगुणविशि
ष्टं तस्य ह वा एतस्य हृदयस्य पंच देवसुषय इत्यादिवाक्यं तत्र ते वा एते पंच ब्रह्मपुरुषा इति श्रुतं तथा चोपास्यस्य [illegible]
पालानां हृदयछिद्रेषु स्थितानां प्राणादिवायूनां ब्रह्मपुरुषत्वोक्तेः हृदयछिद्रेष्वपि ब्रह्मसंबंधोऽवगम्यत इति अ[illegible]
क्ये ब्रह्म प्रकृतं नेह गायत्रीमात्रस्यैवोपास्यत्वे तद्द्वारपालानां ब्रह्मपुरुषत्वं युक्तं। अतो हृदयछिद्रेषु ब्रह्मसंबंधात्त[illegible]
नां ब्रह्मपुरुषत्वं इति ब्रह्मपुरुषश्रुत्युपपत्तेरिति। श्रुत्यर्थस्तु। हृदयस्य पंच देवसुषयः छिद्राणि आदित्यादिनामकैः प्राणादि
भिः देवैः परिपाल्यत्वाद्देवसुषित्वं छिद्राणामुपचर्यते तानि हृदयछिद्राणि हृदयस्य प्राङ्मुखं दक्षिणाभिमुखं प्र
त्यङ्मुखं ऊर्ध्वमुखं उदङ्मुखं [illegible] रूपाणि [illegible] प्राणव्यानापानसमानोदाननामका वायवः क्रमेण आदित्यचंद्राग्निपर्ज
न्याकाशनामकाः [illegible] ब्रह्मपुरुषा इति। तस्माद्गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमिति ज्योतिर्वाक्यैकसंबंधात्तद्ब

राम
१५

॰प्रत्यभिज्ञायत इति सिद्धं ॥ ॥उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ ॥ननु पूर्वस्मिन्वाक्ये त्रिपादस्यामृतं दिवी
ति सप्तम्या द्यौराधारत्वेन निर्दिश्यते। अथ यदतः परो दिवो ज्योतिरित्यत्र पंचम्याऽवधित्वेन द्यौर्निर्दिश्यते। तथा च विभक्तिभेदेन
उपदेशभेदाज्ज्योतिर्वाक्ये प्रत्यभिज्ञानं न संभवतीति चेन्न कुतः उभयस्मिन्नप्यविरोधात् विभक्तिभेदेनोपदेशभेदाज्ज्योतिर्वाक्ये
प्रत्ययेनोपदेशद्वयेऽपि प्रत्यभिज्ञाया अविरोधादित्यर्थः। प्रधानप्रातिपदिकार्थेन प्रत्यभिज्ञायां गुणभूतविभक्त्यर्थेन प्रतिबंध
क इति भावः। तस्मात्परं ब्रह्मैव कौक्षेयकाग्नावुपास्यं ज्योतिःशब्दनाम्नोक्तमिति कं तेज इति सिद्धं ॥ ॥प्राणस्तथानुगमात् ॥ ॥पूर्वस्मि
न्नधिकरणे यदतःपर इत्यत्रेयच्छब्दस्य प्रसिद्धार्थवाचकस्य बलवत्वात्तत्सहकृतं ब्रह्मलिंगं तेजोलिंगापेक्षया बलवदिति दिवइ दिविह
युक्तं। न तथेह किंचिद्बलवत्वसंपादकमस्तीति प्रत्युदाहरणसंगतिरस्याधिकरणस्य। यद्वा पूर्वं दिवि दिवइत्यत्र प्रधानप्रकृत्यर्था
विरोधाद्गुणभूतप्रत्ययार्थोऽन्यथानीतो लक्ष्यदिहापि स्वातंत्र्यप्राणादिपदार्थभेदप्रतीतौ तत्त्वोऽपि ब्रह्मस्वरूपवाक्यार्थप्रतीतेर्गुणभू
तया अपलापो युक्त इति दृष्टांतसंगतिः पदार्थप्रतीतेः स्वातंत्र्यं जनकत्वेन वाक्यार्थप्रतीतेर्गुणत्वं तज्जन्यत्वेनेति बोध्यं। अस्ति कौ
षीतकिब्राह्मणोपनिषदि इंद्रप्रतर्दनाख्यायिका। प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगाम युद्धेन पौरुषेण चेत्यारभ्याम्ना
तं स्यांभ्नायते स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वेति तथोत्तरत्रापि अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृ
ह्योत्थापयतीति तथा न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादि। अंते च स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इत्यादि। अस्यार्थः
दिवोदासस्यापत्यं पुमान् दैवोदासिः प्रियं प्रेमास्पदं धाम गृहं तत्र तो हेतुः युद्धेनेति तत्कारणेन पुरुषकारप्रदर्शनेन च प्रतर्दनो रा
जा इंद्रस्य गृहं जगामेत्यन्वयः। तं दृष्ट्वा इंद्र उवाच प्रतर्दन वरं ते ददामि इति स होवाच प्रतर्दनः हे इंद्र त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हि
ततमं मन्यस इति तं इंद्र उवाच प्राणोऽस्मीत्यादि। मुख्यप्राणं व्यावर्तयति प्रज्ञात्मेति निर्विशेषचिन्मात्रं व्यावर्तयति तं मामिति तदे
वतासंभावनार्थं वाक्यमुक्तं प्राणसंभावनार्थमाह तथेति देहधारणं न वागादिकृतमित्युत्तरमस्मिन्नंतर इत्यस्य पृथगर्थः प्राणस्य त
त्कार्यप्रसिद्धमिति खल्वितीत्युक्तं। प्राणस्य जीवत्वलिंगं न वाचमिति। प्राणस्य परमात्मलिंगं स एष इत्यादि। एवं च प्राणशब्दस्य

सू॰वृ॰
१६

इंद्रप्राणजीवपरमात्मपरत्वे लिंगानां सत्वात्संशयः किंपरः प्राणशब्द इति तत्र प्रसिद्धत्वात् प्राणवायुपर इति प्राप्ते उच्यते ।। प्राणस्त
थानुगमात् ।। तत्र प्राणो ब्रह्मैव कुतः तथानुगमात् तथा ब्रह्मपरत्वेऽनुगमात् अवगमादित्यर्थः । तथा हि प्रतर्दनः खलु हि
ततमं पुरुषार्थं दृष्टवान् तस्य परमपुरुषार्थकामस्य प्राणेऽपास्यत्वेनोपदिश्यते प्राणोस्मीत्यादिना एवं च परमपुरुषार्थ
त्वेनोपदिश्यमानः प्राणः कथं प्राणवायुः स्यात् । तथा स यो मां वेद न ह वै तस्य केनचन कर्मणा मीयते न स्तेयेन न भ्रूणह
त्ययेत्यादि ब्रह्मपरिग्रहे घटते । क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिना ब्रह्मज्ञानिनः कर्मक्षयश्रवणात् ।
तदर्थं तु यो धिकारी मां ब्रह्मरूपं साक्षादनुभवति तस्य विदुषो लोको मोक्षो न मीयते न हिंस्यते महतापि पापेन । ज्ञानमाहात्म्ये
न सर्वस्यापि पापस्य दग्धत्वादिति भावः । एवं प्रज्ञात्मत्वं च ब्रह्मण एव युक्तं । एवमुपसंहार आनंदोऽजर इत्यपि ब्रह्मपरत्वे घट
ते तथा स न साधुना कर्मणा भूयान् भवति नो एवासाधुना कनीयान् एष ह्येव साधु कर्म कारयति एष ह्येवासाधु कर्म का
रयत्येष लोकाधिपतिरेष लोकपाल एष लोकेश इति च ब्रह्मण्येव समंजसम् । अत्र हि धर्माद्यसंस्पृष्टत्वं तत्कारयितृत्वं
तदीशितृत्वं च ब्रह्मणोऽसाधारणलिंगमस्तीति तस्मात्पूर्वापरभावनया ब्रह्मपरमेव प्राणपदमिति । तदुक्तं ।। नव
क्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् ।। ननु यदुक्तं प्राणो ब्रह्मेति तदयुक्तमित्यर्थः कुतः वक्तुरात्मो
पदेशात् । वक्तुरिंद्रस्यात्मत्वेनोपदेशादित्यर्थः । तथा हि वक्ता हीन्द्रो नाम कश्चिद्विग्रहवान् देवताविशेषः स्वमात्मानं प्रतर्दनायो
पदिदेश तिमामेव विजानीहीत्युपक्रम्य प्राणोस्मि प्रज्ञात्मेत्यहंकारवादेन । किं चेंद्रदेवतायाः प्राणत्वे लिंगांतरमस्ति । अरुन्मु
खान्यतीन्सालावृकेभ्यः प्रायच्छमिति । रूतवेदांतवाक्यं तद्येषां मुखेन वर्तते ते अरुन्मुखाः । शालावृकेभ्यः अरण्यश्वभ्यः
नहींद्रब्रह्मणो युक्तं एवमिंद्रपरत्वे इतरद्यप्यसंभवं योजनीयमिति । अत्रोच्यते । अध्यात्मसंबंधभूमा ह्यस्मिन्निति । हि य राम
स्मादस्मिन्नध्याये अध्यात्मसंबंधस्य परमात्मसंबंधस्य भूमा बाहुल्यमुपलभ्यते इत्यर्थः । तद्यथा । यावद्ध्यस्मिन्शरी १६

रे प्राणो वसति तावदायुरिति प्राणस्यैव परमात्मनः परमात्मभूतस्यायुः प्रदानोपसंहारयोः स्वातंत्र्यं दर्शयति न पराधी
नस्येंद्रस्य। एवमस्तित्वं प्राणानां निःश्रेयसमिति श्रुतिरात्मानमिंद्रियाश्रयप्राणं दर्शयति। प्राणस्यास्तित्वे स्थितो प्रा
णानामिंद्रियाणां निःश्रेयसं स्थितिरिति श्रुत्यर्थः। एवमेव न वाचं विजिज्ञासीत वक्तारं विद्यादिति परमात्मानं वक्तारमुप
क्रम्य तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्रा
णेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति वाक्यं विषयेंद्रियव्यवहारानभिभूतं प्रत्यगात्मानमेवोपसंहर
ति। श्रुत्यर्थस्तु तत्तत्र भूतमात्रादिनानानात्वे नेत्यर्थे दृष्टांतः यथा लोके प्रसिद्धस्य रथस्यारेषु मध्यवर्तिशलाका
सु चक्रोपांतं नेमिरर्पिता नाभौ चक्रपिंडिकायामराः अर्पितास्तद्वद्भूतानि पृथिव्यादीनि मात्राः शब्दाद्या विषयाः
मीयंत इति मात्राः प्रज्ञामात्रासु स्वस्वबोधकेष्विंद्रियेषु बुद्धिद्वारा अर्पिताः कर्मेंद्रियेष्वर्पिता द्विषया अर्पिताः तद्धी
नत्वात्तद्व्यवहारस्य ताश्च प्रज्ञामात्राः प्राणे परस्मिन्नर्पिताः प्राणस्य ब्रह्मत्वे लिंगं स एष इति तस्मादध्यात्मसंबंध
बाहुल्यात् प्राणात्मकब्रह्मोपदेशा एवायं न देवतात्मोपदेशा इति सिद्धं। कथं तर्हि वक्तुरात्मोपदेश इत्याशंक्याह॥ ॥
शास्त्रदृष्ट्या तूपदेशो वामदेववत्॥ ॥इंद्रस्य वक्तुर्मामेव विजानीहीत्युपदेशः शास्त्रदृष्ट्या ज्ञातव्यः अहमेव परं ब्रह्मेति
शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः। तत्र दृष्टांतः वामदेववत् यथा वामदेवः स्वदृष्ट्याहं मनुरभवं सूर्यश्चेत्याह तद्व
दित्यर्थः। यदुक्तं मिं द्वेषत्रीनित्यादि देवतापरत्वे लिंगमिति तन्न यद्दृष्टांतवाक्योत्थज्ञानप्रभावादहमेवंभूतोऽस्मीति ई
दृशा वाक्याध्ययनान्निनोचेदरुण्ययम्भः प्रायच्छमित्येतदर्थकत्वेनाविरोधात्तस्मात्प्राणात्मकब्रह्मपरमेतद्वाक्यमि
ति सिद्धं॥ ॥जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्॥ ॥ननु यदुक्तमध्यात्मसंबंध
बाहुल्यान्न देवतात्मा प्राणलिंगान्न वाचं विजिज्ञासीत वक्तारं विद्यादिति तत्सत्यं तथापि न ब्रह्मपरमेतद्वाक्यं

सू.र.
७

किंतु जीवमुख्यप्राणवाद्युपरमपि कुतः जीवलिंगान्मुख्यप्राणलिंगाच्च । न वाचं विजिज्ञासीत वक्तारं विद्यादिति जीव
लिंगं वागादिकरणैर्व्यापृतस्य वक्तुर्जीवस्य विज्ञेयत्वमुपलभ्यते । एवं प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति प्राणलिं
गं देहधारणस्य प्राणलिंगत्वात् तथाहि प्राणसंवादे श्रूयते वागादयः सर्वे प्राणाः प्रत्येकं श्रेष्ठतामात्मनो मन्यमानास्तन्निर्द
धारयिषया प्रजापतिमुपजग्मुः स च तानुवाच यस्मिन्नुत्क्रांते शरीरं पापिष्ठतरमिव भवति स युष्माकं मध्ये श्रेष्ठ इति त
स्मिन् प्रजापतावेवमुक्तवति वागादिषूत्क्रांतेष्वपि मूकादिभावेन शरीरं स्वस्थमस्थात् । मुख्यप्राणस्योत्क्रमिषायां तु वागादी
नां व्याकुलत्वात् तान् प्रति प्राण उवाच मा मोहमापद्यथ यतोऽहमेवैतत्करोमि किंतत् पंचधा प्राणापानादिभेदेनात्मानं विभज्य
एतद्बाणं शरीरं वंचति गच्छतीति वानं वानमेव बाणमस्थिरं शरीरं इति यावत् । तदवष्टभ्य विधारयामीति श्रवणात् देहधारणं
प्राणलिंगमेव ।अर्थ तेनु क्रांता श्रुतिस्तु मा मोहमापद्यथाहमेवैतत्पंचधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामीति
प्राणवायोः प्रज्ञात्मत्वं कथमिति चेत् ज्ञानक्रियाश्रयत्वादिति प्राप्ते ब्रूमः तस्मादुपक्रमादिपर्यालोचनया ब्रह्मरूपैकवाक्या
र्थप्रतीतावपि तस्याजीवमुख्यप्राणरूपपदार्थप्रतीतिजन्यत्वेन गुणत्वात् पदार्थप्रतीतेश्च तज्जनकतया प्रधानत्वादेकवा
क्यार्थप्रतीतिमपोह्य वाक्यभेद एव न्याय्य इति जीवमुख्यप्राणब्रह्मणां त्रयाणामुपास्यानां प्रत्येकं स्वातंत्र्येण वाक्यार्थत्वमि
ति त्रीणि वाक्यानीति चेन्न उपासात्रैविध्यात् त्रीण्युपासनानि प्रसज्येरन्नित्यर्थः । उपक्रमोपसंहाराभ्यां ब्रह्मपरत्वेनैकवाक्य
त्वे संभवति वाक्यभेदो न युक्तः न च पदार्थप्रतीतेर्मुख्यत्वं । तस्या वाक्यार्थप्रतीतिशेषत्वेन तस्या एव प्रधानत्वात् न हि जन
कत्वमात्रेण प्राधान्यं युक्तं । संनिपत्योपकारकाणामपि प्रधानत्वापत्तेः । अन्यत्र ब्रह्मलिंगवशात् प्राणशब्दस्य ब्रह्मणि वृ
त्तेराश्रितत्वाच्च । इहापि हिततमोपन्यासादिब्रह्मलिंगयोगाद्ब्रह्मण एवायमुपदेश इति । यत्तु जीवादिलिंगमस्तीति तत्प
रत्वमिति तन्न । प्राणव्यापारस्यापि परमेश्वरायत्तत्वेन देहधारणस्यापि ब्रह्मण्युपचरितुं शक्यत्वेनानन्यथासिद्ध राम
प्राणवायुलिंगाभावात् तथा च श्रुतिः । न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवंति यस्मिन्नेतावुपाश्रि ७

तावदिति प्राणादिव्यापारस्यैव रायत्ततामाह। नापि नवाच्यं विजिज्ञासीतेत्यादिर्जीवलिंगविरोधः। जीवस्य ब्रह्मणानन्यत्वेन सर्वोपाधिपरि
त्यागेन जीवस्य स्वरूपं ब्रह्म दर्शयितुं नवाचं विजिज्ञासीतेत्यादिः प्रत्यगात्माभिमुखीकरणार्थ उपदेशो न विरुध्यते। यद्वाचानभ्युदितं
येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धीति श्रुत्यंतरं वागादिव्यापारस्य वक्तृब्रह्मत्वं दर्शयति। तस्माद्ब्रह्मपरमेवेदं वाक्यं न प्राणादित्रितयपरं
एकदेशिनस्तु नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यस्यार्थो तरमाचक्षते। तथाहि न ब्रह्मधर्मेण च सहितस्य त्रिविधस्योपास
नस्यैकस्य विवक्षितत्वादित्यर्थः। अतो न वाक्यभेद इति। तत्रायुरमृतमुपास्स्वायुः प्राण इति इदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमु
पासीतेति च प्राणधर्मः। अथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवंतीति तद्व्याख्यास्याम इत्युपक्रम्य वागेवास्या एकमंगमदूदुहत्तस्यै
नाम परस्तात्प्रतिहिता भूतमात्रा प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोतीत्यादिर्जीवधर्मः। ता वा एता दशैव भूतमात्रा अधिप्र
ज्ञं। दश प्रज्ञामात्रा अधिभूतं। यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्रा न स्युः। यद्वा प्रज्ञामात्रा न स्युर्भूतमात्रा न स्युर्न ह्यन्यतरतो रूपं किंचन सि
ध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः
स एष प्राण एव प्रज्ञात्मेत्यादिर्ब्रह्मधर्मः। एतदर्थस्तु प्राणो हि भूतानामायुरिति श्रुत्यंतरेण प्राणस्यायुष्ट्वं सिद्धं। जीवनस्य तदधीन
त्वात्। तस्मात्प्राणस्यैव देहाद्युत्थापकत्वाद्देहादिकमुत्थापयतीत्युक्थं प्राणः। एवमायुष्ट्वामृतत्वोक्थत्वं प्राणधर्म इत्यर्थः। सहवासः
सहोत्क्रांतिश्चेति तुल्यस्थानंतर्यमथवाद्यर्थः। अस्माज्जीवस्य प्रज्ञायाः संबंधीनि भूत्वा सर्वाणि भूतानि तद्दृश्यत्वेन कल्पितानि
वस्तुतो यथैकं भवंति तथा तद्व्याख्यास्याम इत्युपक्रम्याह वागेवेति बुद्धेः साभासायाः स्वरूपतो ज्ञातत्वेऽपि विषयित्वं ना
म रूपपूर्णं शरीरमिंद्रियसाध्यं तत्र नामप्रपंचविषयित्वमर्धशरीरं बुद्धेरहंकारलक्षणायाः तथा रूपप्रपंचविषयित्वमर्ध
शरीरं तथा च कर्मेंद्रियेषु मध्ये वागेवास्याः प्रज्ञाया देहार्धमेकमंगमदूदुहत् उद्दुहितवती पूरयामासेत्यर्थः। नामात्मकप्रपंचे
वाग्द्वारा प्रविष्टा बुद्धिर्नामप्रपंचविषयित्वलक्षणमर्धशरीरमाप्नोतीति यावत्। तस्याः प्रज्ञायाः पुनर्नाम किल परस्तात्प्र

सू.वृ.
१८

भागे रूपप्रपंचविषयित्वलक्षणेऽर्धशरीरे चक्षुरादिना प्रतिविहिता समुत्थापिता भूतमात्रानूपादिरूपाकारपं भवतीत्य
र्थः। चक्षुरादिनाप्रकाशितार्थप्रपंचायां बुद्धेरितरभागं रूपप्रपंचविषयित्वलक्षणे पूरयामास्तेतियावत्। एवं बुद्धिर्वागिं
द्रियेणार्थप्रपंचेन च ज्ञीवारव्यप्रज्ञापूरणं विषयित्वलक्षणं शरीरं प्राप्य इष्टा भवतीति सिद्धम्। तदुपहितचैतन्यद्वारा स्वरू
पेड्भूत्वाध्यासमाह प्रज्ञयेति। तया द्वारा वाचंकरणं प्रतिविंबितात्माहंकर्त्तेत्यध्यासमनुभूय वाचाकरणेन सर्वाणि नामानि
वक्तृत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टृत्वमनुभवतीत्यर्थः। सर्वभूतविषयित्वमात्मनि द्रष्टृत्वादिकं च
क्षुरेवास्या इत्यापादकत्वं च बुद्धेर्धर्म इति फलितं। चक्षुरेवास्या इत्यादिपर्यायांतरार्थोपि संगृहीतः सर्वाधारत्वानंदत्वादिब्र
ह्मधर्म इत्याह। ता वा इति। भूतानि पृथिव्यादीनि पंचमात्राश्च शब्दादयः पंच ता एता दश भूतमात्राः अधिप्रज्ञं प्रज्ञा इंद्रियाणि त
दुत्थज्ञानानि वा अधिकृत्य प्रवर्तते। दश प्रज्ञामात्राः पंचेंद्रियाणि तदुत्थबुद्धयश्च अधिभूतं भूतानि पृथिव्यादीनि शब्दादीनि
वा अधिकृत्य प्रवर्तते एवं भूतमात्राणां दशानां ग्राहकाणां ग्राह्यत्वेन प्रज्ञामात्रात्मकग्राहकापेक्षत्वमुक्तं प्रज्ञामात्राणां दशा
नां ग्राह्यभूतमात्रापेक्षत्वं चोक्तं। इदमेव मिथः सापेक्षत्वं ग्राह्यग्राहकयोः साधयति यद्धीति। तद्दर्शयति नहीति ग्राह्याद्धि
न सिध्यति किंतु ग्राहकादेव एवं ग्राह्यं विना ग्राहकं न निर्वहतीत्यन्योन्यसापेक्षत्वमित्यर्थः। इदं ग्राह्यग्राहकरूपं वस्तु तेन भि
न्नमित्याह नो इति किं त्वेकस्मिन्नात्मन्यारोपितमिति शेषः तद्यथेत्यादिकृतं व्याख्यानं तस्माद्ब्रह्मण एव धर्मत्रयेणोपासनमे
कं विवक्षितं। अन्यत्रापि मनोमयः प्राणशरीर इत्यादौ उपाधिधर्मेण ब्रह्मोपासनस्य आश्रितत्वादिहापि तद्युज्यते तस्माद्ब्रह्मवाक्य
मिति। इदमेकदेशिमतमयुक्तं। तथाहि किमत्रोपासात्रयविशिष्टं ब्रह्म विधेयं उत ब्रह्मविशिष्टोपासात्रयं किं वा नाद्यः ब्रह्मणः सिद्ध
त्वेन विध्ययोगात् नापि द्वितीयः वाक्यांतरेण ब्रह्मणो ज्ञातत्वात् नापि तृतीयः अस्मानुवादेनोपास्तिविध्यैकविशेष्यत्वांगीकारादुपा
स्तीनां मिथोऽसंबंधात् प्रत्युपास्तिविध्यावृत्त्या वाक्यभेदस्य दुरपन्हवत्वात् तस्माद्यथाव्याख्यानमेव रमणीयमिति ज्ञेयमेवं प्रतर्द

२ तदनुवादेनो तदाश्रितस्य उपासात्रयं २

स०सू० तत् किं ध्यायेदित्याकांक्षायामाह। मनोमय इति। विभक्तिव्यत्ययेन मनोमयं प्राणशरीरं ध्यायेदित्यर्थः। आदिशब्दाद्भारूपः
२२ सत्यसंकल्प इत्यादिग्रहीतं मनोमयत्वादीनां प्रकृतब्रह्मलिंगानपेक्षत्वसापेक्षत्वाभ्यां संशयः। किमत्र मनोमयत्वादिगुणकः
शारीर उपास्यत्वेन गृह्यते किं वा परमात्मेति किमत्र युक्तं शारीर इति। कुतः। अप्राणो ह्यमनाः शुभ्र इत्यादिना ब्रह्मणो मनआ
दिसंबंधनिरासात् जीवस्य मनआदिसंबंधस्य सर्वसिद्धत्वात् तस्मान्मनोमयत्वादेः प्रकृतब्रह्मलिंगानिरपेक्षत्वात्तद्गुणकः
शारीर एवोपास्य इति प्राप्ते ब्रूमः। सर्वत्र प्रसिद्धोपदेशात्। अत्र परमेव ब्रह्मोपास्यत्वेन परिगृह्यते। कुतः। सर्वेषु वेदांतेषु
यत्प्रसिद्धं ब्रह्म जगत्कारणं तस्यैवात्र सर्वं खल्विदं ब्रह्मेत्यादिना उपदेशात्। इत्यर्थः। यदुक्तं मनोमयत्वादि प्रकृतब्रह्मासंबंधीति
तन्न। मनोमयत्वादेर्विशेष्याकांक्षायां यत्सर्वं खल्विदं ब्रह्मेति प्रकृतं तदेवान्वेति नाप्रकृतो जीवः। अन्यथा प्रकृतहानप्र
संगात्। न च तदसंभवः। सर्वात्मकत्वेन सर्वस्याप्युपपत्तेरिति। किंच॥ ॥विवक्षितगुणोपपत्तेश्च॥ ॥विवक्षिताः उपासनाया
मुपादेयत्वेनोपदिश्यमाना गुणाः सत्यसंकल्पत्वादयः तेषां ब्रह्मण्येवोपपत्तेरित्यर्थः। मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प
आकाशात्मा सर्वकर्मा सर्वकामः इत्यादिना उपदिष्टाः। यद्यपि मनोमयत्वादि जीवस्यासाधारणं तथापि सत्यसंकल्पत्वा
द्यनुरोधेन सर्वात्मके ब्रह्मणि मनोमयत्वाद्युपपत्तेः। जीवधर्मान्ब्रह्मणि दर्शयति च श्रुतिः। त्वं स्त्री त्वं पुमानसि त्वं कुमार उ
त वा कुमारी। त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुख इति। जीर्णः स्थविरो भूत्वा यो दंडेन वंचसि गच्छसि सोऽपि त्व
मेवेत्यर्थः। अप्राण इत्यादिश्रुतिस्तु निर्गुणब्रह्मविषयेत्यविरोधः। एवं सत्यसंकल्पत्वादीनां ब्रह्मण्युपपत्तिमुक्त्वा जीवे राम
तेषामनुपपत्तिमाह॥ ॥अनुपपत्तेस्तु न शारीरः॥ ॥तुशब्दोऽवधारणार्थः। अत्र मनोमयत्वादिगुणकं ब्रह्मैवोपास्यं न तु शा १९
रीरः। कुतः। अनुपपत्तेः। सत्यसंकल्पत्वादीनां जीवे अंजसैवानुपपत्तेरित्यर्थः। शारीरस्य मनोमयत्वादिगुणकत्वाभावे हेत्वं
तरमाह॥ ॥कर्मकर्तृव्यपदेशाच्च॥ ॥न शारीर इत्यनुषंगः। न शारीरो मनोमयत्वादिगुणक इहोपास्यः कुतः कर्मकर्तृव्यपदेशात्

नवाक्यमितिसिद्धं ॥ इति श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमाध्यायस्य प्रथमः पादः ॥ ॥ एकादशन्या
या अस्मिन्पादे । सू॰आण्येकत्रिंशत्॥ ॥एवं प्रथमे पादे अस्पष्टब्रह्मलिंगानि वाक्यानि सर्वज्ञः सर्वशक्तिर्जगदुत्पत्ति
स्थितिलयकारणब्रह्मपरत्वेन यानीयंते तद्द्वितीयपादे प्रायश उपास्यब्रह्मपराणि विचार्यंते। तृतीये ज्ञेयपरा
णीति विभागः॥ ॥सर्वत्र प्रसिद्धोपदेशात्॥ ॥पूर्वस्मिन्पादे सर्वज्ञत्वादिगुणस्य ब्रह्मणः सिद्धत्वात्तदुपजीव्योत्त
रस्योत्थानाद्धेतुहेतुमद्भावः संगतिः पूर्वोत्तरयोः। पूर्वाधिकरणेनास्याधिकरणस्यावांतरसंगतिर्यथा पूर्वत्र जीवादि
लिंगबाधया ब्रह्मपरत्वमुक्तं ब्रह्मलिंगवशात् न तथेह ब्रह्मलिंगमस्ति किंतु ब्रह्मणः प्राकरणिकत्वमेव तथा च प्रकर
णापेक्षया लिंगस्य बलवत्त्वात् जीवस्य मनोमयत्वादिलिंगमस्तीति तत्परमेवास्त्विति प्रत्युदाहरणसंगतिः। षष्ठपादां
तरत्वान्नावांतरसंगत्यपेक्षेति। सर्वत्राधिकरणे सविषयवाक्यविचाररूपे पूर्वोत्तरपक्षयो रूपाप्तिरेवफलं। यत्र तु
निर्विशेषवाक्यविचारः तत्र पूर्वपक्षे तदुपाप्तिः सिद्धांते प्रमितिरिति भेदः। छांदोग्ये श्रूयते। सर्वं खल्विदं ब्रह्म तज्ज
लानिति शांत उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वी
त मनोमयः प्राणशरीर इत्यादि। अस्यार्थः। सर्वं जगद्ब्रह्मैवेत्यत्र हेतुमाह। तज्जेति। तस्माज्जायत इति तज्जं तस्मि
न्लीयत इति तल्लं। तस्मिन्ननिति चेष्टत इति तदनं तज्जं च तल्लं च तदनं च तज्जलान् अवयवलोपश्छांदसः इति शब्दो
हेतौ। यस्मादेवं तस्मात्सर्वं जगद्ब्रह्मैवेत्यर्थः। स क्रतुं कुर्वीतेत्यत्र विहितमुपासनमनूद्य शांतरूपं गुणं विदधाति शांत
इति। यतो ब्रह्मातिरिक्तं किंचिन्नास्ति अतो द्वेष्याद्यभावात् शांतः सन्नुपासीतेत्यर्थः। गुणं विधाय गुणि विधित्स
या पुंप्रयत्नसाध्योपासनायाः फलमाह अथेति। पुरुषोऽधिकृत उपासकः क्रतुमयः संकल्पमयः तत्र हेतुर्यथेति॥
इह न कर्म वा यथास्मिन्देहे स्थितः संकल्पयति तथा तदनुसारेण फलं परत्र लभते तेन सोऽधिकृतः क्रतुं ध्यानं कुर्वी

एतमितः प्रेत्याभिसंभवितास्मीति। एतमिति प्रकृतमनोमयत्वादिगुणकमुपास्यं कर्मत्वेन व्यपदिशति। अभिसंभवितास्मि प्राप्ता
स्मीति शारीरमुपासकं कर्तृत्वेन व्यपदिशति। न च सत्यां गतौ एकस्मिन् शारीरे कर्मकर्तृभावश्चांजस्येनोपपद्यते। तस्मान्न शारीर
उपास्यः। किंच॥ ॥शब्दविशेषात्॥ ॥मनोमयत्वादिगुणः परमात्मैव न शारीरः। कुतः। शब्दविशेषात्। मनोमयत्वादिविशिष्टपरमात्मा
भिधायकस्य प्रथमांतशब्दस्यैव सत्वादित्यर्थः। तथा हि समानप्रकरणे व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतंडुलो वा एवमयमं
तरात्मन् पुरुषो हिरण्मय इत्यत्र हि पुरुषो हिरण्मय इति प्रथमांतशब्देन परमात्माभिधानं। अंतरात्मन्निति सप्तम्यंतेन शारीरा
भिधानं दृष्टमिति। इहापि प्रथमांतत्वेन श्रुतो मनोमय इत्यादिशब्दः परमात्मपर एवेति। ननु कर्मकर्तृव्यपदेशो न संभवति जी
वब्रह्मणोरभेदादित्याशंकायामाह॥ ॥स्मृतेश्च॥ ॥स्मृतिवशाज्जीवपरमात्मनोर्भेद इत्यर्थः। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इत्याद्या स्मृतिः कल्पितभेदं दर्शयति। अतः कर्मकर्तृव्यपदेश उपपद्यत इत्यर्थः॥ ॥अर्भ
कौकस्त्वात् तद्व्यपदेशान्नेति चेन्न निचाय्यत्वादेवं व्योमवच्च॥ अर्भकं अल्पं ओकः स्थानं यस्य सोऽर्भकौकास्तस्य भावस्तत्त्वं त
स्मादित्यर्थः। एष म आत्मांतर्हृदय इति हृदयरूपपरिच्छिन्नायतनत्वादित्यर्थः। किंच तद्व्यपदेशाच्च। स्वशब्देनैव अणीयान् व्रीहेर्वा
यवाद्वेत्यणीयस्त्वस्य व्यपदेशात्। आराग्रमात्र इहोपास्यः न सर्वगतः परमात्मेति चेत्। न। निचाय्यत्वादेवं। एवं अर्भकौकस्त्वाणीय
स्त्वादिविशिष्टत्वेन रूपेण परमात्मन इह निचाय्यत्वादुपास्यत्वादित्यर्थः। सर्वगतस्य ह्यल्पदेशगतत्वं कथंचिदपि स्वयां संगच्छते
यथा सकललोकाधीशः परमात्मा श्रीरामचंद्रः अयोध्याधीश इति व्यपदिश्यते नैतावता सर्वगतत्वहानिः। तत्र दृष्टांतः। व्योमवदिति य
था सर्वगतमपि व्योम सूचीपाशाद्यवच्छेदेनार्भकौकोऽपि अणीयोऽपि व्यपदिश्यते तद्वद् व्याप्यपीत्यर्थः॥ ॥संभोगप्राप्तिरिति चेन्न
वैशेष्यात्॥ ॥नन्वीश्वरस्य व्योमवत्सर्वगतत्वे चेतनत्वाविशेषात् जीववत्सुखदुःखानुभवरूपसंभोगप्राप्तिरिति चेन्न वैशेष्या
त्। जीवपरमात्मनोरत्यंतविशेषादित्यर्थः। जीवः कर्ता भोक्ता धर्मादिमांश्चेति तस्य सुखदुःखसंबंधो युक्तः परमात्मा तु तद्विलक्ष

सू॰ २० प्राप्तिमेतस्य संभोगप्राप्तिरिति। विशेषएव वैशेष्यं स्वार्थे ष्यञ् अविशेषातिशयद्योतनार्थो वा। न च जीवपरमात्मनोरभेदा
भ्रेकृत्वादिवैलक्षण्यमपि न स्यादिति वाच्यं। बिंबप्रतिबिंबयोः परस्परधर्मसांकर्यस्याबालसिद्धत्वादिति। तस्मान्मनोमयत्वादिगुण
कः परमात्मैवोपास्यो न शारीर इति सिद्धं। अधिकरणं॥ ॥अत्ता चराचरग्रहणात्॥ ॥पूर्वं ब्रह्मणो भोक्तृत्वाभाव उक्ते तर्हि तद्वदत्तृत्व
मपि जीवस्यैव न ब्रह्मण इति दृष्टांतसंगत्येदमारभ्यते। अत्र पूर्वपक्षे उपास्तिः फलं सिद्धांते निर्विशेषब्रह्मप्रमितिरिति विवेकः
कठवल्लीषु श्रूयते। यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्थं वेद यत्र स इति। अस्यार्थः। यस्य पर
मात्मनो ब्रह्म च क्षत्रं चोभे जाती प्रसिद्धान्नवदोदनौ भवतो यस्य च मृत्युः सर्वमारकः उपसेचनं ओदनमिश्रघृतं भवति तद्ब्रह्म सर्वं
स्यात्ता परमात्मा कारणत्वाव र्तते तं निर्विशेषमात्मानं नाविरतो दुश्चरितादिति मंत्रोक्तोपायवान्यथा वेद इत्थमन्यः कः यथाहि
तो न वेदेति काक्वर्थः। अत्र ओदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते तत्र किमग्निरुत जीवः परमात्मा वेति संशयः त्रया
णामप्यस्मिन् ग्रंथे प्रश्नोपन्यासः संशयबीजं किं तावत्प्राप्तं अग्निरिति कुतः अग्निरन्नाद इति श्रुतिप्रसिद्धिभ्यां जीवो वा स्यात्
तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः न परमात्मेति प्राप्ते ब्रूमः अत्ता चराचरग्रहणात् श्रवणादित्यर्थः। मृत्यूपसेचनत्वेन सर्वप्र
पिमात्रस्याद्यत्वेन प्रतीयमानत्वात्। ब्रह्मक्षत्रग्रहणमुपलक्षणार्थं। नहि सर्वसंहर्तुः परमात्मनोऽन्यस्य जीवादेश्चराचरात्
त्वं युक्तं तस्मात्सेश्वर एव॥ ॥प्रकरणाच्च॥ ॥इतश्चेश्वर एवात्ता कुतः प्रकरणात् परमात्मनः प्रकृतत्वादित्यर्थः। न जायते म्रि
यते वा विपश्चिदित्यादिना परमात्मनः प्रकृतत्वात् क इत्थं वेद यत्र स इति च दुर्विज्ञेयत्वं ब्रह्मणोऽसाधारणं लिंगमिति द्रष्टव्यं॥ ॥गु
हां प्रविष्टावात्मानौ हि तद्दर्शनात्॥ ॥पूर्वं ब्रह्मक्षत्रादिकृत्स्नस्य मृत्युपदसंनिधानादनित्यवस्तुपरत्ववदिहापि पिबच्छब्दस्य संनिहित
गुहाप्रवेशादिना बुद्धिक्षेत्रज्ञपरत्वमस्त्विति दृष्टांतसंगत्यास्यारंभः। पूर्वपक्षे बुद्धिभिन्नजीवज्ञानं फलं। सिद्धांते तु निर्गुणब्रह्म
ज्ञानमिति विभागः। अत्र वाक्यांतरं कठवल्लीषु पठ्यते। ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मवि राम
दो वदंति पंचाग्नयो ये च त्रिणाचिकेता इति। अस्यार्थः। ऋतं आवश्यकं कर्मफलं पिबंतौ भुंजानौ जीवपरमात्मानौ छत्रिणो गच्छ २०

तीतिवदेकस्यजीवस्यभोक्तृत्वेनब्रह्मणोपिभोक्तृत्वव्यपदेशः।सुकृतस्यधर्मस्यकार्येदेहरूपलोकेव
र्तमानौ।परार्ध्येपरस्यब्रह्मणःअर्धंस्थानमर्हतीतिपरार्ध्यंहृदयं।तस्मिन्परमेश्रेष्ठेयागुहानभोल
क्षणातांप्रविष्टावुपस्थितौ।छायातपवन्मिथोविरुद्धौकर्तृत्वादित्वलक्षणाभ्यांतौब्रह्मविदःपंचाग्नयः
कर्मिणश्चवदंतित्रिर्नाचिकेतोग्निश्चितोयैस्तेत्रिणाचिकेताःतेपिवदंतीत्यर्थः।तत्रसंशयः।किमिहबु
द्धिजीवौनिर्दिष्टौउतजीवपरमात्मानाविति।तत्रबुद्धिजीवावितिप्राप्तंकुतःजीवस्यबुद्धिभिन्नत्वेन
ज्ञानार्थप्रश्नदर्शनात्।येयंप्रेतेविचिकित्सामनुष्येस्तीत्येकेनायमस्तीतिचैके।एतद्विद्यामनुशिष्टस्त्व
याहंवराणामेषवरस्तृतीयइतिमनुष्येप्रेतेमृतेसतियेयंविचिकित्सासंशयःपरलोकगामीजीवोभोक्ता
स्तीत्येके।नास्तीतिचान्येअतस्त्वयोपदिष्टोहमेतन्निर्विचिकित्संतत्त्वंज्ञातुमिच्छामीतिमृत्युंप्रतिनचिकेत
सायत्वनमिति।नचिकेतामृत्युंवरत्रयंपृष्टवान्।वराणांस्वपितुःसौमनस्यमग्निविद्यात्मविद्याचेत्येते
षांवराणांमध्येएषतृतीयोवरइत्यर्थः।एवंचबुद्धिजीवयोःपृष्टत्वात्तावेवात्रनिर्दिश्येते।किंचगुहाप्र
वेशस्यब्रह्मणोऽसंभवात्ऋतपानासंभवाच्चबुद्धिजीवावितिप्राप्तेब्रूमः॥ ॥गुहांप्रविष्टावात्मानौहित
द्दर्शनात्॥ ॥गुहांप्रविष्टाविहजीवपरमात्मानावेवकुतःआत्मानौहि।हियस्मादात्मानौतस्मादित्यर्थः
ऋतंपिबंतावितिकर्मफलभोगश्रवणेनैकस्तावदात्मेतिद्वितीयोप्यात्मैवन्याय्यस्तत्रहेतुमाह।तद्

र्शनात् इतिसंख्याश्रवणे हि संख्यावतोरेकरूपवतो लोके दर्शनादित्यर्थः। तद्यथा अस्य गोर्द्वितीयोन्वेष्ट
व्य इत्युक्ते गोरेव द्वितीयोन्वेष्टव्यो नाश्वो न मनुष्यः। एवमिहापि ऋतपानत्वसामान्याज्जीवपरमात्मानावेव
बुद्धिविलक्षणजीवप्रश्नस्यान्यदेवेतरं नैतद्वाक्य। नापि गुहाप्रवेशानुपपत्तिर्ब्रह्मणः। यो वेद निहितं गुहा
यामित्यादौ बहुलं गुहाप्रवेशश्रवणात् न चर्तपानानुपपत्तिः छत्रिन्यायस्य दर्शितत्वादिति तस्माज्जीवपर
मात्मानावेव गुहां प्रविष्टौ॥ ॥किंच विशेषणाच्च॥ ॥जीवपरमात्मनोरेवास्मिन्ग्रंथे गंतृगंतव्यभावेन मंतृ
मंतव्यभावेन च विशेषितत्वादित्यर्थः। आत्मानं रथिनं विद्धि शरीरं रथमेव च इत्यादिना अनंतरग्रंथेन रथादि
कल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गंतारं कल्पयति सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति
परमात्मानं गंतव्यं कल्पयति तथा तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमे
न देवं मत्वा धीरो हर्षशोकौ जहातीति पूर्वस्मिन्नपि ग्रंथे मं[illegible]तृमंतव्यत्वेन तावेव विशेषितौ। स जीवोऽध्वनः सं
सारमार्गस्य पारमेव विशिनष्टि। तदिति व्यापनशीलस्य ब्रह्मणः स्वरूपं परमं कार्यकारणातीतं पदं तद्देवपा
रं ज्ञेयं नान्यदित्यर्थः। दुर्दर्शं सूक्ष्मत्वात् दुर्ज्ञानं अतएव गूढमनुप्रविष्टं आच्छादितरूपेण विद्यमानं कुत्रेत्य
त आह गुहेति। गुहायां बुद्धौ आहितं निक्षिप्तं गह्वरे बहुविधानर्थसंकटे देहे स्थितं पुराणं चिरंतनं तमीश्वरमध्या
त्मयोगेः प्रत्यगात्मन्येव चित्तसमाधानं तत्सहकृताद्वाक्यादधिगमः साक्षात्कारस्तेन सोऽहमेवेति निश्चित्य
धीरो विद्वान् हर्षादिकपलक्षितं संसारं जहातीत्यर्थः। तथा समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमा

नः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति मंत्रांतरेपि जीवपरमात्मानावेव विशिनष्टि मंतृमं-
तव्यभावेन आत्मेश्वरयोः समानस्तुल्यो वृक्षो देहः पुरुषो जीवो निमग्नः मनुष्योहमिति अभिनिवेशवान् अनीशया अ-
विद्यया मुह्यमानस्तत्त्वमजानन्ननिशं शोचति संसारमनुभवति। जुष्टं ध्यानादिना सेवितं यदा तत्प्रकर्षदशायामन्यं
बिंबभूतमीश्वरं प्रत्यक्त्वेन पश्यति तदा अस्यैवात्मत्वेन दृष्टस्य महिमानं स्वरूपं प्राप्नोति ततश्च वीतशोको भवति तत्र हेतुरि-
ति शब्देनोक्तः बंधहेतोरविद्याया ध्वस्तत्वादित्यर्थः। न ह्यविद्याध्वंसानंतरं बंधकल्पनं युक्तं। न ह वा एवंविदि किंचन रज
आध्वंसत इति श्रुतेः। रजः अविद्या विदुषि किंचनेषदपि स्वकल्पितं नाध्वंसते न संपादयति स्वस्या एवाभावादित्यर्थः
तस्मात्पूर्वस्मिन्परस्मिंश्च ग्रंथे जीवपरयोरेव विशेषितत्वात्तावेव गुहां प्रविष्टाविति जीवत्वादिधर्मविनिर्मुक्तः परमात्मा
ज्ञेय इति सिद्धं॥ ॥अंतर उपपत्तेः॥ ॥पूर्वं पिबंताविति प्राथमिकछत्रिन्यायाच्चेतनत्वेन बुध्यजीवपरदृष्ट्यनुसाराच्च
रमश्रुता गुहाप्रवेशादयो नीतास्तर्हि तद्वद्दृश्यत प्राथमिकप्रत्यक्षत्वोत्पत्त्या अक्षिप्रतिबिंबात्मावगत्यनुरोधाच्च
मश्रुतामृतत्वादयः स्तुत्यर्थत्वेन कथंचिन्नेया इति दृष्टांतसंगत्यास्यारंभः। पूर्वपक्षे प्रतिबिंबोपास्तिः फलं सिद्धांते ब्रह्मो-
पास्तिरिति। उपकोसलविद्यायां छांदोग्ये श्रूयते। य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्र-
ह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीत्यादि। अस्यार्थः। पुरुषः परमात्मा दृश्यते शास्त्रतः एष आ-
त्मेति उपकोसलं प्रति आचार्य उवाच प्रतिबिंबात्मकछायात्मा वा इत्यर्थमाह। एतदिति इत्युवाचेत्यन्वयः। अक्षिरूप-
स्थानस्य ब्रह्मसारूप्यमाह। तदिति वर्त्मनी पक्ष्मस्थाने इति द्विलीयाद्विवचनं ब्रह्मणो निर्लेपत्वाच्चक्षुषोपि निर्लेपत्वो-
त्सारूप्यमित्यर्थः। तत्राक्षिण्यंतरे परिदृश्यमानः परमात्मा उत प्रतिबिंबादिरिति संशये दृश्यत इति वचनात्सर्व-

गतस्याक्षिस्थानत्वानुपपत्तेश्च न परमात्मा किं तु प्रतिबिंबादिरिति प्राप्ते ब्रूमः। अंतरः अक्षिमध्यगतः परमात्मैव कुतः उपपत्तेः
आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां परमात्मन्येवोपपत्तेरित्यर्थः। न च दृश्यत इत्यनेन विरोधः। दर्शनस्य शास्त्रीयत्वेनावि
रोधात्। किंच एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव वामनी एष हि सर्वाणि वामानि नयति एष उ ए
व भामनी एष हि सर्वेषु लोकेषु भाती त्यत्र निर्दिष्टसंयद्वामत्वादिगुणानां परमात्मन्येवोपपत्तेरंतरः परमात्मैव। तदर्थस्तु। संयद्वाम
शब्दार्थमाह। एतं हीति। वामानि कर्मफलानि एतमक्षिपुरुषं हेतुमाश्रित्याभिसंयंत्युत्पद्यंते संयंति वामान्यस्मादिति संयद्वामः
सर्वफलोदयहेतुरित्यर्थः। वामनीरप्ययमेवेत्याह एष इति। वामनीशब्दार्थमाह। एष हीति वामानि शोभनानि जनं प्रापयति जन
स्य सर्वशुभप्रापकोऽप्ययमेवेत्यर्थः। भामनीपदार्थमाह एष हीति भामानि नयतीति भामनीः अयमेव सर्वप्रकाशक इत्यर्थः। न
हि प्रतिबिंबस्यान्यस्य वा एता दृशा गुणाः संभवंति तस्मादक्ष्यंतः पुरुषः परमात्मा कथं पुनः सर्वगतस्याल्पमक्षिस्थानं व्यपदि
श्यत इत्यत्रोत्तरं पठति॥ ॥स्थानादिव्यपदेशाच्च॥ ॥ईश्वरस्याल्पस्थानादिव्यपदेशो नानुपपन्नः कुतः स्थानादिव्यपदेशात्। य
श्चक्षुषि तिष्ठन्नित्यादावीश्वरस्य चक्षुः स्थानव्यपदेशस्य दृष्टत्वादित्यर्थः। आदिपदेन रूपवत्त्वपरिग्रहो दृष्टांतत्वेनोक्तः। हि
रण्यश्मश्रुरित्यादौ रूपवत्त्वस्योपासनार्थत्वेनोपपादनादिहापि उपासनार्थमल्पस्थानव्यपदेशो न विरुध्यत इति भावः। अपि च
॥ ॥सुखविशिष्टाभिधानादेव च॥ ॥अक्षिपुरुषः परमात्मैवोपदिश्यते कुतः सुखविशिष्टाभिधानात् एवकारेणानात्र संश
यः कार्य इति सूच्यते सुखविशिष्टं ब्रह्म वाक्योपक्रमे श्रूयते तस्यैवेहाभिधानादित्यर्थः। तथा हि गुरुगृह आचार्यानुज्ञया चिर
कालं वर्तमानमुपकोसलं गार्हपत्याद्यग्नय ऊचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्र कं शब्दो वैषयिकसुखे रूढः खंशब्दश्चा
काशे रूढ इति परस्परभेदप्राप्तेः श्रुतिराह यद्वाव कं तदेव खं यदेव खं तदेव कमिति एवं परस्परवैशिष्ट्यप्रतिपादनात्सुखवि
शिष्टं ब्रह्म वाक्योपक्रमे श्रुतमिति तस्यैवात्र ग्रहणं युक्तमिति नाप्रकृतछायादेरिष्यंतः परमात्मा। किंच॥ ॥श्रुतोपनि राम
२२

षत्कगत्यभिधानात्त्व॥ ॥इतश्चाक्ष्यंतः परमात्मा कुतः श्रुतावभ्यस्तादुपनिषद्भ्यो विद्यायेनस्त्रैलोप
निषत्कस्तस्य यागतिरर्चिरादिरूपा तस्याः प्रकृतेअभिधानादित्यर्थः।अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्ध
याविद्ययात्मानमन्विष्यादित्यमभिजयंत एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मा
न्नपुनरावर्तंत इति।स्मृतावपि।अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं॥ तत्र प्रयाता गच्छंति ब्रह्म ब्र
ह्मविदो जना इति यागतिर्ब्रह्मविदां दर्शिता सेवाक्षिपुरुषविदः श्रूयते।अथ यदु चैवास्मिन् शव्यं कुर्वं
ति यदु च नार्चिषमेवाभिसंभवंति इत्युपक्रम्य आदित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषो मानवस्तान्ब्रह्म ग
मयती स एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंत इति।तदर्थत्वात्।अथ देहपाता
नंतरं ब्रह्मचर्यादितपसो हेतुनात्मानमनुसंधायत द्विद्यया ध्यानाल्लब्धयोगेर मार्गमार्चिरादि उपलक्षितं प्र
प्युतेनादित्यद्वाराकार्यं ब्रह्म प्राप्नुवंतीत्यर्थः।कार्यं ब्रह्म विशिनष्टि एतद्वैति व्यष्टिसमस्तं प्राणानां समष्ट्य
भिमानी हिरण्यगर्भः स्थानमित्यर्थः।तस्य वास्तवं स्वरूपमाह।एतदमृतमिति।एतद्विशेषणसिध्यर्थं हे
तुमाह।एतस्मादिति।स्मृतावग्न्यादिशब्दैरातिवाहिन्यस्तदभिमानिन्यो देवता गृह्यंते।अथ लुकार्थे।अर्चि
नुपासके मृते यदि पुत्रादयः शव्यं शवसंबंधि संस्कारादिकर्म कुर्वंति यदि वा न कुर्वंति उभयथाप्यप्रतिहतापि
स्लफलास्ते उपासका अर्चिरायभिमानिनी देवतां प्राप्नुवंति अर्चिषोहर्देवतां ततः शुक्लपक्षदेवतां ततः ष
ण्मासोपलक्षितोत्तरायणदेवतां ततः संवत्सरदेवतां ततश्चादित्यं ततश्चंद्रं ततो विद्युतं प्राप्नुवंति तत्र
स्थितानुपासकान्ब्रह्मलोकादागत्यामानवः मनुष्यसृष्टावनुत्पन्नः ब्रह्मलोक इति याव

सू॰वृ॰ २२ त। स पुरुषो गंतव्यं कार्यं ब्रह्म गमयति प्रापयतीति। अर्चिरादिदेवैर्नेतृभिरुपलक्षितत्वाद्देवपथः। गंतव्येन
ब्रह्मणोपलक्षितत्वाच्च ब्रह्मपथः। एतेन यथा कार्यं ब्रह्म प्रतिपद्यमाना पुनरिमं मानवं मनोः सर्गं जन्म
मरणाद्यावृत्तियुक्तत्वात् आवर्तरूपं नावर्तंते न प्रविशंतीति। तस्मादक्षिपुरुषः परमात्मा। इत्यत्रा
क्षिपुरुषः परमात्मा न प्रतिबिंबात्मेत्याह॥ ॥अनवस्थितेरसंभवाच्च नेतरः॥ ॥इतरश्छायापुरु
षादिरक्षिगत इति नियुक्तं कुतः। अनवस्थितेः उपासकस्य सर्वत्राक्षिणि छायासंपादकबिंबरूपपु
रुषांतरस्यानवस्थानादित्यर्थः। असंभवाच्च अमृतत्वादिगुणानां छायापुरुषे असंभवादित्यर्थः। तस्मा
त्परमात्मैवाक्षिस्थानेउपास्य इति सिद्धं॥ ॥अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्॥५॥ पूर्वस्मान्नादिव्यपदे
शाच्चेति सूत्रे यः पृथिव्यां तिष्ठन्नित्याद्यंतर्यामिब्राह्मणस्थ यश्चक्षुषि तिष्ठन्नित्यादिवाक्यमंतर्या
मिणो ब्रह्मत्वं सिद्धवत्कृत्योदाहृतं तदाक्षिप्य समाधीयत इति आक्षेपसंगत्येदमारभ्यते। पूर्वपक्षे
यत्परत्वेनोवाक्यं नीयते तदुपास्तिः फलं सर्वत्र सविशेषविचारे द्रष्टव्यं। सिद्धांते ब्रह्मोपास्तिरेवेतीहा
पि तथा फलं द्रष्टव्यं। अंतर्यामिब्राह्मणे श्रूयते। य इमं च लोकं परं च लोकं सर्वाणि भूतानि योंतरो यमयती
त्युपक्रम्य यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो य
मयत्येष त आत्मांतर्याम्यमृत इत्यादि। अत्र पृथिव्यां तिष्ठन्नंतर्यामीत्युक्ते स्थावरादिरिति शंकां
वारयति पृथिव्या इति तदभिमानिदेवतां प्रत्याह। यमिति। अशरीरस्य कथं नियंतृत्वमित्यत
आह। यस्येति। नियम्यकार्यकरणसंघातेनेव नियंतृत्वमिति फलितमाह। य इति तस्य भिन्नत्व राम
भ्रमं वारयति एष इति तेन मम चेत्यर्थः। एवं यः पृथिव्यामित्याद्यधिदैवतानंतरं यः सर्वेषु लोकेषु २२

अथ
ब्रह्मसूत्रवृत्तिः

ब्र. सू. २५

नमं सर्वाणी सुक्तं वा हिति शिरोधिधर्माणामश्रवणात् प्रधानमेवादृश्यत्वादिगुणको भूतयोनिः स्यादिति प्राप्त आह । अदृश्यत्वा[illegible]
ष्ट्रे ग्रांवाक्यमाम्नायते । अथ परा यया तदक्षरमधिगम्यते । यत्तददृश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं
सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इत्यादि । [illegible] अपरविद्योक्ता तदानन्तर्यमथशब्दः [illegible]
क्षरमधिगम्यते सा परा उत्कृष्टफलकत्वात् विद्येत्यर्थः । अक्षरस्य स्वरूपमाह [illegible] दृश्यं ज्ञानेन्द्रियागम्यम् [illegible]
न्द्रियाविषयः । अगोत्रं वंशमूलं अवर्णं [illegible] न केवलमिन्द्रियाविषयः किं तु [illegible] आह । अचक्षुःश्रोत्रं न विद्येते चक्षुःश्रोत्रे [illegible]
तथा इदं च ज्ञानेन्द्रियोपलक्षणम् । कर्मेन्द्रियाभावमाह । तदपाणिपादं तदस्य नास्तीति तत्तथा उपलक्षणमेतत् [illegible]
नित्यं अनाद्युपलक्षितं विभुं प्रभुं सर्वगतं सर्वकल्पनाधिष्ठानं सुसूक्ष्मं दुर्ज्ञेयत्वात् तदव्ययं नाशाभावात् [illegible]
परिपश्यन्ति धीराः सा परा विद्येत्यन्वयः । तत्र संशयः । किमदृश्यत्वादिगुणको भूतयोनिः प्रधानं [illegible] परमात्मा वेति । अदृश्यत्वादि
[illegible] प्रधाने संभवात् प्रधानमिति प्राप्ते ब्रूमः । अदृश्यत्वादिगुणको भूतयोनिः परमात्मैव । कुतः । धर्मोक्तेः । यः सर्वज्ञः सर्वविद् यस्य ज्ञान
मयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत इति ईश्वरधर्मस्य सर्वज्ञत्वादेर्भूतयोनौ निर्देशादित्यर्थः । सामान्यतः [illegible]
तः सर्वविद्यत्वं यस्य ज्ञानमेव तपस्तस्मादीश्वरादेतत् कार्यरूपं हिरण्यगर्भादि । [illegible] सूक्ष्मभूतात्मकं नाम स्थूलभूतात्मकं [illegible]
[illegible] व्रीह्यादि सर्वं भोग्यं [illegible] जायत इत्यर्थः । नन्वक्षरात्परतः पर इत्यक्षराद्भूतयोनेः परस्येश्वरस्य सर्वज्ञत्वं श्रूयते न भूतयोनेरिति [illegible]
नाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति येन ज्ञानेनाक्षरशब्दोक्तं भूतयोनिं सर्वज्ञं पुरुषं सत्यं वेद तां ब्रह्मविद्यां [illegible]
ताय प्रोवाचाचार्य इति । [illegible] इत्युपक्रम्याक्षरात्परतः पर इत्युच्यमानः परो न भूतयोनेरतिरिच्यते । किं त्वक्षरादित्युक्ताव्याकृतात् [illegible]
इति न विरोधः । किं च विषयवाक्ये अक्षरात्मके भूतयोनिविद्यायाः परत्वं श्रूयमाणं भूतयोनेर्ब्रह्मत्वं गमयति न हि ब्रह्मविद्यातोऽन्या विद्या
परा भवितुमर्हति । मोक्षफलकत्वात् । अपरत्वस्य ब्रह्मविद्यायामेव संभवात् । अत्र विद्योपक्रमे ऋग्वेदादीनामपरविद्यात्वं [illegible]
त्यम् अनित्यफलकत्वेनाभिन्दति च नित्यफलकब्रह्मविद्याप्रशंसायै । तस्मात्परविद्याविषयभूतमक्षरं भूतयोनिर्ब्रह्मैव । [illegible]
[illegible] अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्तीति निन्दितत्वात् कर्मविद्या राम २५

रामानन्दप्रणीता

यधिलोकंयःसर्वेषुवेदेष्वित्यधिवेदं यःसर्वेषुयज्ञेष्वित्यधियज्ञंयःसर्वेषुभूतेष्वित्यधिभूतंयःप्राणेष्वित्याद्यियआत्मनी
त्यंतःअध्यात्मं केन्चेश्चिदंतरवस्थितोयमयितांतर्यामीश्रूयते।ऽयंकिमधिदेवाद्यभिमानीदेवतात्माकिंवाप्राप्ताणिमाद्यै
श्वर्यःकश्चिद्योगीकिंवापरमात्मेतिसंशयः किंतावत्प्राप्तं देवतात्मेति कुतः पृथिव्येवयस्यायतनमग्निर्लोकोमनोज्योतिरि
तीत्यादिनाकार्यकारणसंघातस्यदेवतायाःश्रुतत्वेन तस्या नियंतृत्वोपपत्तेः।यस्य देवस्य पृथिवी आयतनंशरीरं अग्निर्लोकः
चक्षुर्मनएवज्योतिरित्यर्थः।नह्यशरीरस्येश्वरस्यनियंतृत्वंयुक्तं तस्माद्देवतात्मायोगीवेति प्राप्तेब्रूमः।अधिदैवादिषुश्रूय
माणोंतर्यामीपरमात्मैवकुतः तद्धर्मव्यपदेशात् तस्यपरमात्मनोधर्माणामिहव्यपदेशादित्यर्थः।सर्वतिर्यामित्वमात्मत्वम
मृतत्वमदृष्टत्वं चेहपरमात्मनोऽसाधारणधर्माउदाहृतवाक्येदृष्टव्याः।नचाशरीरस्यकथंनियंतृतेतिवाच्यं।नियम्यशरीरे
णैवतस्यनियंतृत्वोपपत्तेरिति।ननुप्रधानमंतर्याम्यस्त्वित्याशंक्याह।नचस्मार्तमतद्धर्माभिलापात्।स्मार्तंसांख्यस्मृति
कल्पितंप्रधानंनांतर्यामिशब्दवाच्यं।कुतःअतद्धर्माभिलापात् तच्छब्देन प्रधानमुच्यते तेन तत् प्रधानभिन्नःपरमात्मेत्
यर्थः।तस्यैवचेतनस्ययेधर्माद्रष्टृत्वादयस्तेषामिहाभिलापात् अभिधानादित्यर्थः।अदृष्टोद्रष्टाऽश्रुतःश्रोताऽमतोमंताऽविज्ञा
तोविज्ञातेतिवाक्यशेषेद्रष्टृत्वादेर्यश्चेतनधर्मःश्रूयते इतिनाचेतनंप्रधानमंतर्यामीत्यर्थः। तर्हि चेतनोजीवोऽभवत्वंतर्या
मीत्यतआह॥ ॥शारीरश्चोभयेपिहिभेदेनैनमधीयते॥ ॥शारीरोनांतर्यामीतिनकारस्यपूर्वसूत्रादनुषंगः कस्मात्
उभयेपिहिकाण्वामाध्यंदिनाश्चांतर्यामिणोभेदेनैनंशारीरंपृथिव्यादिवदधिष्ठानत्वेननियम्यत्वेनचाधीयते।योविज्
ञानेतिष्ठन्नितिकाण्वाः विज्ञानपदंजीवपरं।यआत्मनितिष्ठन्नितिमाध्यंदिनाःतस्मात्पृथिव्यादिवन्नियम्यत्वमेवजी
वस्यननियंतृत्वं भेदेनैवमधीयतइतिपाठेएवं योविज्ञानेतिष्ठन्नित्यादिनाप्रकारेणोत्यर्थोबोध्यः।तस्मादधिदैवादि
षुअंतर्यामीपरमात्मैवेतिसिद्धं॥ ॥अदृश्यत्वादिगुणकोधर्मोक्तेः॥६।पूर्वंप्रधानविरोधिद्रष्टृत्वादिधर्मवशान्नप्रधा